Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूमिका



केषां शिक्षितानामशिक्षितानां वाऽविदितमेतद् यदेकोनविंशतितम्यां वैक्रमशताब्द्यां सकलजगद्वन्दनीयचरितोऽप्रतिममभावो लोकोत्तरयशा विहितशिष्टविशिष्टसमादरो निराकृतावैदिकसिद्धान्तः सुबहुमतिभातशास्त्रार्थतत्त्वो वेदादिसच्छास्त्रेषु दृढतरभक्तिः निरस्तवेदनिन्दककुतार्तिकोत्थापितसमस्तदोषः सत्यैकनिष्ठोऽसत्यदुराग्रहदुर्वासनादिदोषनिर्दलनक्षमो विशेषप्रतिभासम्पन्नोऽतिविद्वत्ताशालीभीष्मइवाऽऽशरीरपातमविप्लुतब्रह्मचर्यो भारतहितैषिणां धुरन्धरो भगवद्भक्तिप्रवणो विलक्षणो वादे, विचक्षणो वेदव्याख्याने लौकिकव्यवहारे च, सुलक्षणः शरीरे, निराकर्ता यवनाद्यवैदिकमतानामनुष्ठाता-योगाङ्गानां, धर्षयिता अखर्वगर्वजुषांवैतण्डिकविशाम् समुद्धर्ता वेदप्रतिपादितार्थरत्नानां प्रताप इव स्वधर्मे निश्चलो विदितवेदितव्यो विवर्जितैषणात्रिकोयतीन्द्रः श्री०१०८स्वामी दयानन्दसरस्वती नामाऽमुं लोकमलंचकारेति बहवो विज्ञास्तदीयं लोकोत्तरं चरितमुपकर्णयितुं कृतादराः संजाताः संलक्ष्यन्ते चेदानीं; निष्कारणदयालो र्निगमश्रद्धालोस्तस्य जीवनचरितं को नाम खलमन्तरा श्रद्धया प्रेम्णा वाऽन्यथा वा श्रोतुं न समुत्सहेत ! महात्मनां जीवनचरितश्रवणं हिस्वमनोविशोधनपुरस्सरं परमानन्दाय कल्पत इति सर्वसंमतम् । निर्व्याजभावसंभृतचेतसा भारतमुद्धिधीर्षोदयानन्दात्परः कोऽप्यन्यो महात्मा गतशताब्द्यां न प्रादुर्भूत इत्यतिरोहितमेव ज्ञानदृष्ट्या भारतीयदशां पश्यतां विदुषाम् ।

संस्कृतभाषैवैका चिरस्थायिनी तद्भिन्नानां भाषाणामुपचयापचयाव्यवस्थादर्शनेनाचिरस्थायित्वात् । अस्मद्दौर्भाग्यपरिपाकादेव तादृशस्य महापुरुषस्य जीवनचरितमिदानींयावत्तथाविधं न दृग्गोचरीभूतं यद्विद्वज्जनमनःप्रसत्तिकारि सत् विविधशिक्षामोदकैरन्तेवासिचेतांस्यपि प्रमोदयेत् इत्याकलय्यैकदा मया श्रीमानुपाध्यायो दिलीपदत्तशर्मा मदन्तेवासी तज्जीवनचरितं संस्कृतभाषयोपनिबन्धुं समादिष्टः । स च बहुकार्यव्यग्रोऽपि

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्यगभ्यस्तव्याकरणकाव्यकोशादिः पूर्वमसंपादितकाव्यकर्माऽपि केवलं मद्वचनपरिपालनकामनयैव यथाशक्ति "मुनिचरितामृत" नामकस्यैतद्यानन्दचरितस्य पूर्वार्द्धं झटित्येव प्राकाशयत् । एतस्यैनिष्कारणकर्मणः कृते ननु धन्यवादार्हः श्रीमानुपाध्यायः । कीदृशमिदं मुनिचरितामृतं ! निर्दोषं सदोषं वा ? सरसं नीरसं वा ? इत्यत्र तु सहृदयाः काव्यमर्मवेदिन एव प्रमाणं भवितुमर्हन्ति ।

सत्यमेतद् यन्महापुरुषाणां जीवनवृत्तान्तं निरूपयितुं महामनीषिणः कालिदाससदृशाएव प्रभवन्ति, तथापि तादृशानामभावे स्वमनोविनोदाय स्वात्मनः पवित्रीकरणाय वा, तथा कर्तुं प्रयत्यतएव सर्वैरित्युपाध्यायमहाभागस्याऽप्ययं प्रयत्नःसफलःस्यादितिमन्ये। पक्षपातगन्धशून्यै र्वेदैकभव्यपक्षपातिभिरार्यविद्वद्भिर्यद्ययं ग्रन्थःसमाद्रियेत तदाऽस्य द्वितीयोभागः सद्यएवमुद्रणं लम्भयिष्यते तथैवभगवान् विदधातु ॥"गच्छतःस्खलनंक्वापिभवत्येव प्रमादतः॥ हसन्तिदुर्जनास्तत्र समादधति सज्जनाः"इतिन्यायं स्मारयिषुः प्रेसकार्यकर्तृकृताः अशुद्धयः क्षन्तव्या इति च विज्ञापयिषुः पुनरपि ग्रन्थकर्त्रेऽनेकान् धन्यवादान् दित्सु र्विद्वदनुरक्तो—

निवेदयिता—

भीमसेनशर्मा

ज्वालापुरीय महाविद्यालय

मुख्याध्यापकः



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओ३म्

अथ मुनिचरितामृते ।

प्रथमो विन्दुः

अत्यद्भुतं जगदिदं समजृम्भतादौ यत्कौशलातिशयतन्त्रतया समस्तम् ।
यस्यप्रबन्धवशतश्च यथाव्यवस्थं जागर्त्ति संहृति मुपैति यत स्तथान्ते ॥१॥
यो बाह्यसाधनकलापविहीन एकः सर्वस्यजन्तुनिकरस्यदयासमुद्रः ।
न्यायं करोतितरकां विभुराप्तगम्यो भूयात्सुदुर्गतिहरः सहरः सदा वः ॥२॥
यदा यदा धर्म्महति र्जगत्यां प्रजायते ऽनर्थवशाद् बृहत्याम् ।
तदा तदा कोऽपि परोपकारी तदुन्नतिं कामयते ऽर्थकारी ॥ ३ ॥
एवं प्रवादो भुवि निर्विवादो विराजते [१]लोकविचारणायाम् ।
श्रीरामकृष्णादिमहानुभावा[२]निदर्शनान्यत्र सतां मतानि ॥ ४ ॥
अज्ञानितागदनिपीडितमानसत्वात् कर्त्तव्यताऽऽ[३]कलनमन्दमनोरथत्वात् ।
स्वार्थित्वकामलरुजा हतबुद्धिदृष्टि र्जाता यदा हि[४]जगती कृतपापसृष्टिः ॥५
प्रादुर्बभूव खलु कोपि तदा तपस्वी रुद्धेन्द्रियो विहितयोगविशुद्धचेताः ।
विज्ञातशास्त्रनिचयो हितकामनातो यत्नंचकार नितरां जगतो यशस्वी ॥६
युक्तिप्रमाण[५]निकरास्त्रबलेन यावच्छास्त्रार्थ[६]जन्यभुवि योद्धुमना बभूव ।
पाखण्डिवर्गभटगर्वविनाशहेतु स्तावत्तु शून्यमवनीतलमग्रतोऽभूत् ॥ ७ ॥
दयापूर्व आनन्दशब्दो यदीय[७]समाख्यामिषं प्राप्यकैङ्कर्य्यकामः ।
तथास्वामिशब्दोऽपि वाग्देवतायुक् तदग्रे समागत्य साफल्यमापत् ॥ ८ ॥

---

[१]लोकस्तु भुवने जने, इति विश्वः [२] निदर्शनानि, उदाहरणानि [३]आकलनम् आचरणम् ४जगती भुवने क्ष्मायां छन्दोभेदे जनेऽपि चेति मेदिनी [५] संघाते प्रकरौघवारनिकरव्यूहाःसमूहश्चयः, इति हैमः [६] संग्रामाहवसंप्रहार-समराजन्यंयुधायोधनमितिहैमः। [७]आख्याह्वे ऽभिधानंचनामधेयंचनामचेत्यमरः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरन्निशाकान्तमरीचिकान्ताः प्रसर्पिणो यस्ययशःप्रवाहाः ।
प्रकाशयन्ति स्म दिगन्तराणि पुने गिरस्तच्चरितामृतेन ॥ ९ ॥
आम्नायतोयधिसमुद्धृ ततत्त्वरत्नः संसारभावुकनिमित्तकृतोऽयत्नः ।
स क्लेशभक्तिजलमार्जितचित्तदोषः सत्योपदेशरविधावित१मौढ्यदोषः १०
कास्मादृशो नुपुरुषः कवितानभिज्ञःसाहित्यशास्त्रपरिबोधविकुण्ठितज्ञः ।
कामं मृणाल२गुणतश्चपलस्वभावः कर्त्तुंवशे करिवरं धृति मातनोमि ॥११
पङ्गु र्यथा गिरिपतेः शिखरं रुरुक्षुः पाथोनिधिप्रतरणेच्छुरपाणिरज्ञः ।
हास्यंप्रयाति३समितौ प्रविवेकभाजां तद्वन्ममापि भविताऽत्र दशेति मन्ये ॥१२
ये मां मदीया गुरवो न्ययोजयन्नस्यां कृतावद्भुतशक्तिशालिनः ।
काव्यचिन्तामणिसुप्रभावत स्तेषां मया वा कृतिना भविष्यते ॥ १३ ॥
सन्त्यत्र दोषैकदृशो मनुष्याः कामं क्षितौ४ यद्यपि भूरिसंख्याः ।
तथापि यत्नोऽत्र मया विधीयते न चौरभीत्या धनिता प्रहीयते ॥ १४॥
निर्मत्सराः सितधियो भुवि ये मनुष्याः श्रोत्रे मनागपि गुणानवतंसयन्ति ।
येषां मनो नच रुचिं कुरुते परेषां दोषेषु तेऽत्र विरला विलसन्ति धन्याः ॥१५
नित्यं सतां कृत्यविकार५गन्धं यो बोधयत्यत्र विनैव हेतुम् ।
महोपकारस्य मया विधेयः किं न स्तवस्तस्य कृतज्ञभावात् ॥ १६ ॥
हे दुर्जन ! त्वं ननु दुर्जनत्वं सम्प्राप्य किं किं वितनोपि सत्त्वम् ।
इत्येव मुक्तिं तनितुं प्रयुक्तिं नचिन्तयेद्दत्र सुखं मनुष्यः ॥ १७ ॥
विलोक्य लोकं भवतः सशोकं ६श्लोकंमति प्राणभृतां सुधीर ! ।
विद्वेषिभावं कुमतिप्रभावं न साम्प्रतं मौनितया भवेयम् ॥ १८ ॥

---

१ दोषा रात्रौ भुजेपि चेति विश्वः ।
२ पद्मनाले तु मृणालं—तन्तुलं बिसमिति हैमः ।
३ समितिः सम्पराये स्यात्सभायां संगमेऽपि चेति विश्वः
४ क्षितिर्निवासे मेदिन्यां स्थानमात्रेऽपि च क्षितिरिति विश्वः ॥
५ गन्धः संबन्धलेशयोः । गन्धकामोदगर्वेष्विति हैमः ।
६ पद्येयशसि चश्लोकइत्यमरः ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतोऽस्मि किंचिद्भवतः कथंचित्स्तवं विधातुं समुपस्थितोऽहम् ।
यतो नवा स्यादिह विज्ञतायाः १क्षितिः क्षितौ सूरिविभूषणायाः ॥१९
ये त्वां विनिन्दन्ति जना नितान्तं किन्ते विदुस्ते परमार्थतोऽन्तम् ।
इत्येव मागत्य जनोहि कश्चित्पृच्छेन्नवेति प्रवदेद्विपश्चित् ॥ २० ॥
ये सज्जनाख्या जगति धियन्ते ते त्वा मनादृत्य मुधा हसन्ति ।
कृतोपकारं किल हन्त मूढा गतिर्विचारस्य महानिगूढा ॥ २१ ॥
लोकद्वयं त्वं न विचार्य्य नैजं करोषि तेषामुपकारमेव ।
क्व त्वां विना सज्जनताविवेकः प्रवर्त्ततामत्र च २सातिरेकः ॥ २२
यद्यप्यनेके त्वयि सन्ति भद्रा गुणा गुणीड्ये गणनादरिद्राः ।
तथापि विद्वेषमुपैति लोक स्त्वां प्रत्यहो रेचित३सद्विवेकः ॥ २३ ॥
येषां विचित्रचरितानुकृतिप्रभावा त्सर्वेष्टसिद्धिमुपयातु मलं जनः स्यात् ।
तत्रैव मे नतितति र्विलसे न्निकामं ते सन्ततं च निखिलार्थजुषो भवन्तु ॥२४
धन्यः स एव पुरुषो भुवि जायमानः सौजन्यजन्ययशसां ननु भाजनं यः ।
४सातङ्कतानुभवखिन्नमती न्विभर्त्ति संहर्त्तु मिच्छति तथा कुटिलस्वभावान् २५
लोकोपकारकरणे न मनो यदीयं नैवास्ति यस्य जगदीशनमोऽभिलाषः ।
[५]हेवाकिता भवति दुर्व्यसनेषु यस्य धिक्तं नराधममनार्यगुणैः परीतम् ॥ २६
आबालवृद्धमिह यस्य यशःप्रशस्तिः प्रस्तूयते सुकृतिनो द्युनिवासिनोऽपि ।
तस्यैव जन्म सफलं विफलं परस्य मत्त्वेति सज्जनगण ! प्रतनुष्व यत्नम् ।
काव्यामृतास्वादनयोग्यताकः सच्चित्रचारित्रविचारणाकः ।
शक्तिग्रहोपायनिकाय६धारी निर्म्मत्सरस्त्वत्र जनोऽधिकारी ॥ २८ ॥
श्रीगुर्जरप्रान्तललामभूता या मौरवी राजपुरी प्रतीता ।
सम्पत्तिमल्लोकनिवासहृद्या कर्म्मिष्ठविद्वद्गणगीत७पद्या ॥ २९
तस्यां पुरा कोपि यथार्थनामा बभूवविप्रः किल भूरिधामा ।
विद्वन्नमस्याविधिदत्तचित्तः शैवः सदाचारविचारवित्तः ॥ ३०

१ क्षितिः क्षयः—क्षितिर्निवासे मेदिन्यां कालभेदे क्षये स्त्रियामिति मेदिनी । २ सातिरेकः सातिशयः । ३त्यक्तसमीचीनाविवेचनः । ४आतङ्को रोगसन्तापशङ्कासु मुरजध्वनौ, इतिमेदिनी । ५हेवाको ऽध्यवसायितेति पुरुषोत्तमः । ६निकायो निवहो व्यूहः समूहो विसरो व्रजइतिवैजयन्ती । ७पद्या वर्त्मनिकीर्तिता ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

परोपकारादिगुणैकधामा१ लोकश्रुतोऽम्बादिकशङ्कराख्यः ।
अद्यापि यच्छ्लोककथाप्रसङ्गो नयातिविश्रान्ति महो बुधेषु ॥ ३१ ॥
तस्य प्रिया प्रियतमा पतिदेवता या शुद्धान्वया विततकीर्त्ति[२]रपांसुलासु ।
३दिष्ट्या यदा किल दधार महाप्रभावा गर्भं तदा वसुमती मुदितेव जाता३२
सा राजधानी खलु चित्ररूपा जज्ञे तदा मङ्गलवृत्तभूपा ।
समस्तमर्त्त्या मुद मादधानाः समुत्सवाँश्चक्रुरहो सुदानाः ॥ ३३ ॥
ऋतुगणोऽपि यथासमयं समः क्षितितले ऽवततार तदा समः४ ।
जगतिभावुकभाजनताजुषां पुरत एव जनैः सुविधाः समाः ॥ ३४ ॥
सा सोमदिक्पालवसूर्मिसङ्ख्ये संवत्सरे विक्रमभूमिजानेः ।
प्रभातकाले सुषुवेऽतिमारं कुमाररूपं च सती कुमारम् ॥ ३५ ॥
सम्पर्कशीताः परितः ५समीरणाः समीरयन्तः सुमनोरजःकणान् ।
सुखं ववु स्तत्र शुभैकशंसिनो दधे मुदा सर्वजनैर्हृदा यतः ॥ ३६ ॥
विभाव्य तं कान्तरुचिं कलङ्की दोषाकरो म्लानमुखस्तदानीम् ।
पयोनिधाने ब्रुडितुं सलज्जः खिन्नः ससर्पेव जवान्नभस्तः ॥ ३७ ॥
अरिष्टगेहं परितोऽवलाजनः फुल्लारविन्दोपमितास्यवैभवः ।
तारस्वरं मङ्गलगीतिमादधे सम्भूय सानन्दमथो यथातथम् ॥ ३८ ॥
प्रबुध्यमानाः पुरुषाः सविस्मयाः श्रुत्वा तदीयं किल मङ्गलध्वनिम् ।
परस्परं प्राहु रहो सकौतुकं पौरा स्तदानीं निपुणा मुदायुताः ॥ ३९ ॥
सुप्तोत्थितः सकल एव जनो विभाति संहर्षनिर्झरतुषारविविक्तवक्त्रः ।
कस्मादयं भवति कर्णसुखैकहेतु र्ढक्कामृदङ्गपटहादिकलप्रणादः ॥ ४० ॥
एवं चिरं यावदनेकचर्चां सम्पादयन्तोऽपि न तथ्यवृत्तम् ।
विज्ञातुमासन्नलमेधितज्ञाः परोक्षवृत्तान्तचणा न साक्षाः ॥ ४१ ॥
किं कोकिलानां ध्वनि रेष जायते वर्णक्रम स्तत्र भवे त्कथं पुनः ।
गन्धर्वनारीजनचेष्टितं यदि न सम्भवः स्वर्गनिवासिनो भुवि ॥ ४२ ॥

---

१ धाम रश्मौ गृहे देहे स्थाने जन्मप्रभावयोरिति विश्वः । २ अपांसुलासु-पतिव्रतासु— ३दिष्ट्या—दैवेन । ४ सश्रीकः—मयासह वर्तमान इतिकृत्वा—मालक्ष्म्यांवरणेऽव्ययमितिहैमः ॥ ५ समीरणा वायवः—वायुः समीरसमिरौपवनाशुगौनभः श्वासोनभस्वदनलश्वसनाः समीरणाः इतिहैमः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विज्ञाय तज्जन्म पितार्भकस्य तुष्टो यथारीति महं चकार ।
जन्मोत्सवा कारितभूमिदेवः सम्पत्तिशाली हुतवह्निदेवः ॥ ४३ ॥
निशम्य तन्नामविधानघस्रं[1] समागता स्तत्र जनाः सहस्रम् ।
सम्बन्धिनो धार्म्मिकभाववन्तः [2]प्रसत्ति सन्दोह फलं वहन्तः ॥ ४४ ॥
षडङ्गविद्यार्णवजालपादाः[3] सत्कर्म्मचर्य्यास्तुतिलब्धवादाः ।
सामुद्रिकाशेषविचारविज्ञा स्तन्नामधेयं व्यधुरात्मविज्ञाः ॥ ४५ ॥
सोमप्रभोऽयं जगतः समुन्नतिं वेदानुकूलव्यवहारकारकः ।
करिष्यमाणो ऽन्वयनामविस्तृतिं कर्त्तेत्यवोचंस्तमु मूलशङ्करम् ॥ ४६ ॥
तन्नामसंस्कारविधेरनन्तरं सत्कारभाजो विबुधाः शुभाशिषम् ।
सौन्दर्यसंपज्जितराममारे प्रायोजयँस्तत्र सकृ त्कुमारे ॥ ४७ ॥
निगमरीतिसमुन्नयनं सदा विरचयन्निह नित्यमतन्द्रितः ।
कुटिलताकुलमाकुलतां नयन् शिशु रयं चिरजीवितता मितात् ॥ ४८ ॥
[4]सपक्षजन्मेव पुपोष वृद्धिं द्विजन्मजन्माऽशितिपक्षजन्मा ।
लब्धोदयो देवकृते यथायथा यशोंऽशुमालोदमिषत्तथातथा ॥ ४९ ॥
पौर स्तदीयं सकुतूहलं वपु र्विलोकयन् कश्चिदमन्दसुन्दरम् ।
तज्जन्मदोद्दामविधिप्रशस्तिप्रस्तावसंपादनतत्परोऽभूत् ॥ ५० ॥
निसर्गमञ्जुध्वनिरम्बिकाङ्गो वापेति तातं प्रतिभाषमाणः ।
मृदुस्मितो बन्धुजनातिहर्षं संवर्द्धयामासतरां कदाचित् ॥ ५१ ॥
नो दुर्बलान् बालजनान् बलाढ्यो सोऽतर्जयन् निर्धनिकान् धनाढ्यः ।
नाऽऽलोकयत्तुच्छदृशा कदाचिद्यत्तत्समस्तार्भकवल्लभो ऽभूत् ॥ ५२ ॥
आजानुबाहुः सच शङ्खकन्धरः कपाटवक्षा ह्यतिमात्रसुन्दरः ।
[5]फुल्लारविन्दायतदेवदीपकः [6]करीन्द्रयानः स्वकवंशदीपकः ॥ ५३ ॥

---

१ घस्रम्–दिनम् इति हैमः ॥ २ प्रसत्तिः प्रसन्नता, सन्दोहः समूहः ३ जालपादा हंसाः । जालपादः श्वेतगरुत्मकांगो मानसप्रिय इति वैजयन्ती ४ पक्षजन्मा चन्द्रः– दाक्षायणीपतिवलक्षगुपक्षजन्मेति हारावली ५ देवदीपस्तु लोचनमिति पुरुषोत्तमः । ६ करीन्द्रस्ययानमिवयानं यस्यसः गजेन्द्रगामीतिथावत्

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतोलिकायां विहरन् यतो यतो वयस्यवृन्देन गत स्तत स्ततः ।
विलोकयन्तः परितोमुखश्रियं पौराः शिशो रस्य न तृप्तिमाययुः ॥ ५४ ॥
लुठन् पृथिव्यामयमर्भकः सुखं रजःकणव्याप्तशरीरयष्टिकः ।
उदाजहारेव मनोऽभिवाञ्छितं व्रतंभविष्य त्पुरतो हसन्मुखः ॥ ५५ ॥
सञ्जातरूपादिविनिर्मितानि नानाप्रकाराण्यपिभूषणानि ।
व्यजीमणद्बन्धनशृङ्खलानिव स्वभावगम्या हि यतो मनोरथाः ॥ ५६ ॥
स्वल्पायुषो प्यस्य विचारचातुरीं विनिस्पृहत्वं च समस्तवस्तुषु ।
निरीक्षमाणाः पुरवासिनो जना निश्चिक्यु रेनं परमाद्भुतोदयम् ॥५७॥
हास्येऽपि मिथ्याकथनं महामना नायं चकारोत्तमभावभाजनम् ।
कार्पण्यकालुष्यपरीतमानसो नालोकि केनापि शिशुःकदाचन ॥५८॥

नानाक्रीडारसगतमना लोलवालः स बालः ।
कुन्दक्षीरद्युतिरतिमुदो मन्दहासप्रकाशः ।
विख्यातोऽभू न्निखिलनमरे चित्ररूपस्वरूप
स्तमिञ्शीघ्रं मृदुलवचनः सत्ययुक्तिप्रयुक्तिः ॥५९॥

इति प्रथमो विन्दुः ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ मुनिचरितामृते द्वितीयो विन्दुः ।

विज्ञानागमरीतिपालनपरः पुत्री बतः पुत्रकं
विद्याधीतिपरिश्रमक्षममतिं मार्तण्डदेवद्युतिम् ।
आलोक्याष्टमवत्सरे जनिदिनाद्यज्ञोपवीतं तथा
विद्यारम्भविधिं विधाय निपुणं शिक्षां तदर्थं ददे ॥१॥

अध्याप्य सन्ध्यादिविधिं पुरस्ता त्सारस्वतं पाठयतिस्म पश्चात् ।
ततः स शैवः शिवभक्तिबोधं[१] प्राचर्चयत्स्तोत्र मनिन्द्यबोधम् ॥२॥
पठन्गुरोः सोऽपि कुशाग्रबुद्धिः क्षिप्रंप्रबुद्धोऽजनि[२] सिद्धि सिद्धिः ।
सारस्वतं सार मबोधि धीर स्तुतोष तत्तात जनोऽथ [३]धीरः॥३॥
ततःस म ङ्क्त्वेव[४] समाप्य चन्द्रिकां पपाठ वर्णी यजनोपदेशिकाम् ।
पितुः स्वकात्सस्वरवेदसंहितां स्वर्गापवर्गागमरीतिसंहिताम् ॥४॥ स्फुटश्छन्दोऽ भङ्गः।
एवं सदाचारविभूतिशाली निलिम्पकल्पः शुभभावमाली ।
त्रिकाण्डकोषं समधीत्य दान्तः स्वबुद्धि वैशद्य मथो ततान ॥५॥
अदीनभावोऽपि विदीनदीनः कामस्वरूपोऽपि च कामहीनः । दीनं दुःखं दौर्भाग्यम् ।
विवेकिभिः सोऽसुविचारतत्परै र्विवेचितः किंपुरुषै र्नवा परैः ॥ ६ ॥
ततस्तदीयः शिवभक्तियुक्तः सामागमज्ञो विषयेष्वसक्तः ।
महेशपूजारुचिकं विधातुं वावश्यमानोऽजनि तं कुमारम् ॥ ७ ॥
शिवालयं तत्रभवान्महात्मा स्वदारकं शुद्धमतिं यतात्मा ।
प्रगृह्य तं साक्षतपञ्चशाखः श्रद्धान्वितोऽगाद्धृतवेदशाखः ॥ ८ ॥
स धूर्जटे श्छात्रवरो निकेतं तातेन साकं परितः सुकेतुम् ।
विशालशालं च विशालशालं गत्वा महेशं प्रणनाम देवम् ॥ ९ ॥
समस्तभूताग्यपि यस्य शासने विराजमानानि सदाविकासतः ।
नमामि तं त्वा विजयामहर्षिणं कृताञ्जलि र्व्याकृतिमूलभाविनम् ॥१०॥

---

१ प्राचर्चयत्—अपाठयत्—चर्चअध्ययने, इत्यस्य लङिरूपम् । २ सिद्धिस्तुमोक्षे निष्पत्तियोगयोरिति हैमचन्द्रः । ३ धीरोधैर्य्यचिते स्वैरे बुधे क्लीबन्तुकुंकुमे इति मेदिनी । ४ मङ्क्षुशीघ्रम् । मङ्क्षु शीघ्रेभृशेतत्त्वे, इतिहैमः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कपर्दिपूजाकलनप्रसक्तं विलोक्य सूरिर्मुमुदे स्वपुत्रम् ।
मनोरथावाप्तिमता जनेन सन्तुष्यते भूमितले न केन ॥ ११ ॥
पुराणगाथानुगुणं गुणीड्यः प्रबोधयामास पुनः पुनस्तम् ।
महेशमाहात्म्यविचारलाभा भवन्तिवाभ्यासवतां सतांहि ॥ १२ ॥
दिगम्बरध्यानमसौ यथायथं चकार नैवेति मुधावदेत्तु कः ।
पितुर्नियोगानुगुणं गुणप्रियः कुमारभावा दुपवास मन्तरा ॥ १३ ॥
मुहुर्मुहुः सज्जनलोकमान्य स्तदोपवासस्य फलं [१]वदान्यः ।
स ब्राह्मणो युक्तिविशेषयुक्तं ब्रूतेस्म तं कान्तगुणप्रसक्तम् ॥ १४ ॥
अयेवटो ! त्वं विदुषांसभायांसंलब्धकीर्तिर्ध्रियसे [२]सभायाम् ।
अधीतशास्त्रीयविचारणायाः प्रतीपभावं खलु मास्मयायाः ॥ १५ ॥
अनेकलाभप्रदतोपपन्नः किन्नोपवासोऽभ्युपगम्यते ते[३] ।
स्वधर्मशास्त्रोक्तविधौ विधेयो यत्नस्त्वया धैर्यधरोऽसि तात ! ॥ १६ ॥
हितोपदेशं शुभकर्मदक्षः कृत्वाकृतीलब्धविधेयदीक्षः ।
यावद्विरामं व्रजति स्म तावत्स्वधर्मपत्नीं स समालुलोके ॥ १७ ॥
कृतानतिः कोमलकान्तवर्णाऽप्यपांसुलासंसदिलब्धवर्णा[४] ।
५कान्तं सुकान्तं धृतशास्त्रसारा प्रोवाच धैर्येण महाविचारा ॥ १८ ॥
स्वामिन्वचो युक्ततमं तवेदं जानामि सर्वं ननु निर्विकल्पम् ।
आयुःक्रमोऽप्यत्र विनिश्चितो यः शास्त्रेषु नो विस्मरणीय एषः ॥ १९ ॥
कथं कुमारः श्रितकोमलाङ्गो विधर्तु मीष्टे कठिनं व्रतं तत् ।
नचाधिकारा द्रहितेषु पुंसु शास्त्रीयकार्यं घटते विचार्यम् ॥ २० ॥
विदग्धमूढावगति प्रयोजनं ततान नो चिह्न महो सुयोजनम् ।
विचित्रसंसारविधानपण्डितः समस्तशक्तिव्रजभाग६ खण्डितः ॥ २१ ॥

---

१ चारुभाषी, वदान्यो दानशौण्डे च चारुवादिनि वाच्यवदितिमेदिनी २ भयासहवर्त्तमाना सभा तस्या माभिरूपरूपशालिन्या मितियावत् । ३ तेत्वया । तेइतिस्यात्त्वयेत्यर्थे मयेत्यर्थे चमेइति—इतित्रिकाण्डशेषः।४लब्धवर्णा विदुषी—विद्वान् सुधीः कविविचक्षणलब्धवर्णा इति हैमः । ५ कान्ता नार्य्यां प्रियङ्गौ स्त्री शोभने त्रिषु ना धवे, इतिमेदिनी ॥ ६ अखण्डित इतिच्छेदः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विचारणाम्नायविनिश्चितार्थं करोति यः पञ्चजनो यथार्थम् ।
[१]दोषज्ञताभाजन माहु रार्या स्तमेव सम्पादितयुक्तकार्याः । २२
अधीतशास्त्रोऽपि समीक्षणं विना यश्चेष्टते भूमितलेऽत्रमानवः ।
वदन्ति तंमूढधियं मनीषिणः क्व वाकभीतिं जिहते मनस्विनः ॥ २३ ॥
सरस्वतीवागमगीतसंस्तुतिः समानमाख्याय पतिं पतिप्रिया ।
मुधाङ्गसंशोषणदुःखतः सुतं जुगोप साध्वी बहुवारमेव तम् ॥ २४ ॥
ततः कदाचिच्छिवरात्रियात्रा महेशभक्तप्रमदातिमात्रा ।
समागताऽभूत्समयेन याता कुतूहलं यज्जनता[२] प्रयाता ॥ २५ ॥
अथ प्रभाते कृतनित्यकर्मा तमङ्क मारोप्य सुतं सुधर्मा ।
व्रतप्रशस्तिं प्रकटय्य विज्ञः कृतोपवासं कृतवान्विधिज्ञः ॥ २६ ॥
क्षुधा पिपासा कुलतां गतः सन्दिनं व्यतीयाययथाकथंचित् ।
पितुर्नियोगा त्स पटुः पटूक्तौ प्रयत्यते वा विदुषा विमुक्तौ ॥ २७ ॥
रात्रौ तमाहूय द्विजेन्द्रवर्य्यः सूनुं पुनः सोऽ[३]प्यनवद्यचर्यः ।
शिवालये जागृतिलाभमानं व्यज्ञापयत्तं बहुसावधानम् ॥ २८ ॥
श्रुत्वा गुरोर्जागरणोपदेशं श्रद्धान्वितश्छात्रवरो विशेषम् ।
स्नातानुलिप्तो धृतशुद्धचेलः प्रायाद्भवौकोधुतचित्तखेलः ॥ २९ ॥
यथोक्तरीत्या जनकेन बालः सच्छास्त्रविज्ञानसरोमरालः[४] ।
अनेकवाद्यध्वनिपूरिताशं द्विजन्मसन्दोहगृहीतवासम् ॥ ३० ॥
वारद्वयं तर्हि समस्तमानवा निशीथतः पूर्वमुपासितुं क्षमाः ।
अतन्द्रिता स्तत्र यथाविधिप्रभुं प्रकल्पितं ते च[५]विलक्षणक्षणाः ॥ ३१ ॥
पूजाप्रकारं निखिलं मुहुर्मुहु र्ददर्शवर्णी निपुणं विवेकवान् ।
स विस्मयोऽयं श्रुतदेवलीलः प्राग्जन्मसंस्कारविशुद्धशीलः ॥३२ ॥
उपासका स्तन्द्रितमानसा यदा पराङ्मुखाः स्वीयविधेयतस्तदा ।
जाताःक्षणं जागृतिभागयं व्रती न वा प्रमादं भजते क्वचित्कृती ॥ ३३ ॥

जागरिद्वितेन चिदि साधी

१—दोषज्ञता विद्वत्ता दोषज्ञः प्राज्ञैवद्ययोः, इति कोशः । २—जनता—जनसमुदायः । ३ अनवद्यचर्य्य प्रशस्ताचरणः . ४ मरालोहंसः ॥ ५ काल-विशेषउत्सवः क्षण इत्यमरः

CC-0. Prof. Satya Vrat Shastri Collection.

+नतालव्यादिरेव सुखवचनः।
किन्तु दन्त्यादिः।

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुषुप्ति[१]शाताव गतिप्रसक्ता न्दृष्ट्वाऽथसम्यग्भवभक्तिरक्तान् ।
कुतूहली कश्चि दनूनकाय आखु र्बिलाच्चारुगतिः प्रयाय ॥ ३४ ॥
[२]मीनाण्डिकाः पुष्पपरागभाविता श्चखादसौहित्यकरी[३] र्यथारुचि ।
निःशङ्कचेता कृतचारुवक्त्रः क्व दीनभावं भजते स्वतन्त्रः ॥ ३५ ॥
[४]निभाल्य तत्कृत्यमसौ विचक्षणः सम्प्राप्तसद्धर्मविचार शिक्षणः ।
पुराणगाथाश्रुतशर्वविक्रमः साकूतचिन्ता मकरोच्छुभक्रमः ॥ ३६ ॥
यो दैत्यसन्दोहविनाशकर्ता ख्यातो भवः सर्वविनम्भर्ता ।
तस्योपरिष्टा दवलोऽपि मूषकः स्थित्वा भवेदर्घ्यपदार्थ दूषकः ॥ ३७ ॥
सङ्कल्पमात्रेण समस्तसिद्धयः सिद्ध्यन्ति यस्यादिमनिर्जरस्य ।
कथं नवाऽऽखुं विहितापमानं निवारयेत्सोऽत्र महाभिमानम् ॥ ३८ ॥
यद्यस्ति विश्वासुमता मुमापतेः सर्वोऽधिकारः श्रुतिगीतसंस्तुतेः ।
तुच्छोऽप्ययं जन्तु रहो विरोधितां गच्छन्न नेयः किमु तेन रोधिताम् ॥३९
[५]स्वाहाभुजां भावुककामनाजुषा क्रतुद्विषो [६]भालदृशापुराऽमुना ।
निहत्य कीनाशनिकेतनं प्रति प्राहेषताद्याऽत्र कथं न चेतति ॥ ४० ॥
पिनाकिना येन पुरा पुरत्रयं सहेल मेवाशु विना शितं किल ।
किं मद्य शेते विटत स्तिरस्कृतः किं [७]वाऽक्षवाटे हि [८]पलङ्कटोऽजनि ॥४१॥
सदैकरूपः परिकीर्तितो यो वेदान्तवृन्देन च देवदेवः ।
कथं विकारीतिमति र्विधेया तत्राप्तशिक्षापि न जातु हेया ॥ ४२ ॥
उच्छिष्टतां भोजन मस्य सम्यङ् नयन्नयम्मूषकएषतुष्टः ।
विधाय पादौ शिरसि प्रयातीत्युत्प्लावमुत्प्लाव मभीतिजुष्टः । ॥ ४३ ॥

१—शर्म्मशातसुखानिचेत्यमरः । २—व्रताशा इति लोके भाषा । ३—तृप्तिः सौहित्यमा घ्राण मिति हेमः । ४—निभाल्य विलोक्य ५—स्वाहाभुजस्तुवसुलाः पूजिताश्चाचिरायुषः शौभानिलिम्पाद्युषदः स्वर्गिणश्चनभः सदइतिऽत्रिकाण्डशेषः ६—एकत्रिदृग्भाल दृगेकपाद इति हैमः प्राहेषत- प्रेषिताः । ७—अक्षवाट स्तु मल्लभूरितिपुरुषोत्तमः । ८ भीरुस्तुभेलो हरिणहृदयः । स्यात्पलंकटः इति पुरुषोत्तमः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

निजाशनं[१] नापि विरक्तितुं यः प्रभु र्भवेत्तं परिपालकं कः ।
वक्तुं समर्थः प्रभविष्यतीहप्राज्ञ स्तु मूर्खस्य कथैव का वा ॥ ४४ ॥
एवं विचारं रचयँश्चिरं स्थितः शङ्काकुलात्मैकक एवतार्किकः ।
लेभे यदा नोत्तरमात्मतुष्टये सुप्तं [२]गुरुं स्वं निकपागतस्तदा ॥४५॥
संगृह्य पादे पितरं शनैः शनैः प्राबोधयत्सभ्यतमोऽतमोमतिः ।
अनुद्धतो धार्मिकमर्मभुक्तुकः सन्तिष्ठते शङ्कितमानसो नरः ॥ ४६ ॥
किंतेव्यलोकीतियदाहृतं वचःपितागभीरंगदितुं लसत्कचः ।
तदायथाभूतविचारवानसौयथातथंस्वंनिजगादवृत्तकम् ॥ ४७ ॥
निद्राप्रमोदानुभवाचितान्त[३]रक्ताअभूवन्निखिलाभवन्तः ।
यदातदाऽदर्शि मयाद्भुतं यन्निशम्यतां तद्भवताऽपि सर्वम् ॥ ४८ ॥

[४]आजानचञ्चलवदेः किमु वत्सजात–
मुद्विस्मयेन यदये ! त्वयका प्रजातम् ।
अध्यास्य शैवमपि शान्तमिदं निशान्तं–
वाचाट शङ्कितममा ध्रियसे नितान्तम् ॥ ४९ ॥

आख्याय ताते विरतिं प्रयाते पुरः समुत्थाय जगादवृत्तम् ।
आखोः शिवोपायनवस्तुनाशिनो मनोगतं ख्यातुमलंविवेकिनः ॥ ५० ॥
आकर्ण्य पुत्रस्य वचस्तदानीं रोषाकुलस्तं स बभाणमानी।
कुतर्कशील स्त्वमरे महाधमविशङ्कसेयत्परमेश्वरम्प्रति ॥ ५१ ॥
सरोषभाजाजनकेनतर्जितःप्रतीपभावंनगतोजगद्धितः ।
नताग्रदेहःपुरतःसुवाणीमुवाचविन्यस्यचमूर्ध्निपाणी ॥ ५२ ॥
कोपो नवायं भगवन्भवत्कृतः श्रद्धान्विते वालजने वरंपितः ? ।
जिज्ञासुनावादि वचो मया यद्विरुद्धमेवावगतं कथं तत् ॥५३॥
भवादृशा श्चेत्प्रतिभासमन्विताः प्रश्नोत्तरंदा तुमलं नशिक्षकाः
निराश्रया हन्त तपस्विनी क्षितौ कुतर्कविद्याशरणं व्रजेद्गुरो ! ॥ ५४ ॥

---

१ भोजनं न्यादः स्वदनं खादनमशनंनिघसो वल्भनमभ्यवहारः इति हैमः ।
२समयानिकषाहाप्रतियोगेषूपसंख्यानमिति द्वितीया । ३ आचितं निचितंपूर्णं पूरितं भरितं भृत मिति मङ्खः ४ आजानं स्वभावः स्यादिति हारावलिः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शनैः शनै र्युक्तिवचो ऽमृतोर्मिभिः प्रचण्डकोपानलतप्तमानसम् ।
प्रशान्तचेष्टं कृतवान्सतं सुखं किं किं नकर्तुं प्रभवन्ति वाग्मिनः ॥ ५५ ॥
हसंस्ततःसूरिवरस्तनूजंमहेश्वरोदन्तकदम्बकंकम्[१] ।
सम्भाषितुं भाषणकौशलंदधत्प्रवृत्तिमाधातुमनावभूवसः ॥ ५६ ॥
हेमुग्धबुद्धे प्रतिमा विराजते माहेश्वरी यातु विलोक्यते त्वया ।
उट्टङ्कना नोविहिता हिता वटो महेश्वरे का विपरीतभावना ॥ ५७ ॥

एवं पुत्रं कथमपि महातार्किकं तर्कभीरुः ।
सन्तोष्याशु प्रथितमतिकं क्रोडभाजं तदानीम् ॥
आवासं तं कृतशिवनतिः प्रेषयामास पूर्वं ।
किं नैपुण्यं स्वजनमथवा मौनिनंकर्तुमर्हम् ॥ ५८ ॥

इति द्वितीयो विन्दुः

१—कंसुखंयथास्यात्तथा—जलशीर्षसुखेषुकामितिमेदिनी ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथमुनिचरितामृते तृतीयोविन्दुः—

अथो प्रभाते कृतजागृतिः सुखं विशुद्धवारा परिमृज्य [१]सन्मुखम् ।
पितुःसमीपे गतवांस्तदाज्ञया जगाद वर्णी विनयीति सादरम् ॥ १ ॥
पितर्महेशो निरणायि नो मया यथाश्रुत स्तत्र निकेतने निशि ।
अतो भवन्तः कृपया विनिश्चयं विधाय शीघ्रं निगदन्तु कोऽस्त्ययम् ॥२
विचित्र संसारविनिर्मिति र्विना विलक्षणं जातुभवे न्न शिल्पिनम् ।
परन्तुपाषाणमयस्तुनास्तिसः स्वतन्त्रकर्तापरवा [२]नपीह कः ॥ ३ ॥
मुधापरा[३]कादि तदीयकारणा त्समुत्सहेऽहं न विधातु मादरात् ।
न रोचते मे जडपूजनंवरं [४]विचेतनं वस्तु ददातु किं वरम् ॥ ४ ॥
सदुत्तरे [५]नागरिकत्वहीनतां दधान मालोक्य गुरुं प्रवीणताम् ।
दधत्पितृव्यं निकषागमत्तदा स्ववाञ्छितंवक्तु मसौ युतोमुदा ॥ ५ ॥
निशम्य सभ्यः सच तस्य निश्चितंसतां प्रियःसत्यधनस्य संस्तुतम् ।
सहोदरं चाह हठं त्यजेः सुतं वदे र्न किञ्चित्स करोतु हीप्सितम् ॥ ६ ॥
ततो निघण्टुं सनिरुक्तकं कृती सकल्पसूत्रंच पपाठ स वृती ।
[६]शरद्द्वयेनैव गुरोर्महात्मनः क्वदीर्घसूत्रित्व मुपैति तद्विधः ॥ ७
विलोकितुं तातसखस्य कस्यचित् कुटुम्बिलोकै र्नवनाटकं क्वचित् ।
जगाम वर्णी स विनापि वाञ्छया करोति किं किं परवान्निजेच्छया ॥८॥
[७]अकाण्ड एवाशु तदीयकिङ्करःसमागतोऽभू त्किल को ऽपि सन्मतिः ।
कनीयसीं तस्यसहोदरां जगौ विशूचिकारोगनिपीडितांच सः ॥ ९ ॥
[८]मुदन्तमाकर्ण्य ततस्तदीय मुदन्तमेतं सहसा विचक्षुषः ।
बभूवु रच्छायमुखाः कुटुम्बिन स्ते तत्क्षणं क्षीणमहोमहो[९]त्ककाः ॥१० ॥

१—विपश्चित्, व्यक्तोविपश्चित्संख्यावान् सन्नितिहैमः । २—परवान्परतन्त्रः परः परवः पराधीनः परवा न्नाथवानपीतित्रिकाण्डकोशः । ३—पराक्रोत्रतम्—पराक स्तु व्रते खड्गेइतिमेदिनी । ४ श्रेष्ठम्—वरोऽभीष्टेदेवादे र्वरोजामातृषिंङ्गयोः श्रेष्ठेऽन्यवदितिविश्वः । ५—नागरिकत्वंप्रवीणता । ६—शरत्संवत्सरः शरत्संवत्सरोपिचेति—पुरुषोत्तमः ७—अकाण्डेऽनवसरे। काण्डं नाले तरुस्कन्धे बाणेऽवसरनीरयो रितिविश्वः । ८—मोदनाशनम् । ९—नष्टमहोत्सवोत्सुकता का इयियावत् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थाना त्तत स्तेऽनुमितिं विनैव बन्धो र्ययुः स्वंप्रति सब्रसभ्याः ।
सम्बन्धिबन्धोऽपि तदैव युज्यते यदा मनो नैतिविकारपद्धतिम् ॥ ११ ॥
अनेकवैद्यै रुपचारपण्डितै र्विनिस्पृहै स्तत्र ददे महौषधम् ।
तथापि तस्या नहि निर्गता रुजा [१]क्वसाहसिक्यं प्रचले द्विधे र्विधौ॥१३॥
यथायथावैद्यजनै र्यशोधनैः स्वशास्त्ररीत्या निपुणं चिकित्सिता ।
तथातथा वृद्धिमियाय वेदना प्रमाथिनी बन्धशुचा समं हहो ॥ १३ ॥
क्षणान्तरे चाथ फलोदयालयं महामती सा तरसा गुणालया । *अत्र चिन्तनान्डीव दुर्लभः।
नकेवलं बान्धवलोकवृन्दकं विहाय याताऽपजहौ यशोऽपि च ॥ १४ ॥
विलोक्य [२]विप्राण मथो कलेवरं कुटुम्बिनोऽस्या रुरुदुः सुनिर्भरम् ।
क्व यासि वत्से ! त्वमितो विहाय नः प्रत्युत्तरं [३]रासिकुतश्चिराय न ॥१५॥
समस्तबन्धूनवलोक्य दुःखितान् स वर्णिमुख्यो रहसि स्थितो हि तान् ।
विचारिताशेषभवव्यवस्थितिः खिन्नोभवन्नित्थमभावयद्यतिः ॥ १६ ॥
मयाऽमृतान्वेषणमत्र संसृतौ विधीयतां यावददोस्ति जीवनम् ।
जगत्पदार्थो निखिलोऽपि मानवं न मृत्युभीतेः परिरक्षितुं क्षमः ॥ १७ ॥
अनेकभावाकुलमानसं जना आलोकयंस्तं कृतभूरिरोदनाः ।
अवाष्पनेत्रोऽयमहो कथं बटु र्विनिष्ठुरत्वादिति तै रुदीरितम् ॥ १८ ॥
विवेकशाली स तु मूलशङ्कर स्ततो विमुक्तिप्रदमीशमेककम् ।
विचारयँस्तीव्रमतिर्विरक्तिभाग् विलक्षणां कामपि वा दशां गतः ॥ १९ ॥
इयं दशा तस्य महात्मनो जनै रज्ञायि नो कैरपि वंशजैः परम् ।
विवर्द्धमानां महतां कृतिं विना फलप्रसूतिं नहि वेत्ति कश्चन ॥ २० ॥
संवत्सरे हन्त तदैव कोविदः पितृव्यवर्य्योऽपि विचारशेवधिः ।
दिवं प्रयातोऽस्य समाप्य मानुषीं समस्तलीलां विधिवत्प्रतापवान् ॥ २१ ॥
[४]विदग्धवृन्दिष्ठसमाजभूषणःसत्कर्मचर्य्याधुतचित्तदूषणः ।
अहो पितृव्यो निगमाध्वनिष्ठः क्वेतो गतो मेऽद्य सतां वरिष्ठः ॥ २२ ॥
हा बान्धवा अद्य समे रुदन्तः शोचन्ति यं भव्यविचारवन्तः ।
रात्रिन्दिवं साश्रुविलोचना हा लुक्कायितः किं स कुरीतिताहा ॥ २३ ॥

१ साहसिक्यम्—बलात्कारः । २ प्राणरहितम् । ३ ददासि रादाने, इत्यस्य-रूपम् । ४ विदग्धःपण्डितः—

१ कुत्सिता रीतयो येषां ते कुरीतयः, तैः समासा-सम्बन्धाभिधानं भावप्रत्ययेन,

CC-0. Prof. Satya Vrat Shastri Collection.

× कष इति मूर्धन्यषकारेणैव साधु।

Digitized by Arya Samaj Foundation Chennai and eGangotri

चारित्र्यगाङ्गे[१]यकशो यशोधनः स्वज्ञातिमध्ये कृतभूरिशोधनः ।
परोपकारीमितभाषिणांवरः स कुत्र यातो जगतो धुरन्धरः ॥ २४ ॥
परेतराट् तेन विना त्वदीयं कार्य्यं विनष्टं किमु यन्निमित्तम् ।
हृतो जगल्लोचनलोकचन्द्र त्वद्दोषराहो र्वदने विलीनः ॥ २५ ॥
हा देव दुश्चेष्टितमत्रलोके प्रवर्त्तमानं परितोऽवलोके ।
तदुक्तिसंख्यान महोविधातु मलं भवेदेष जनो न जातु ॥ २६ ॥
हंहो विधे ! तावकचेष्टितानि ज्ञातानि केनासुभृता समानि ।
करोषि मङ्क्षु त्व मनेकरूप मापत्तिसन्दोह मशस्त्यरूप ! ॥ २७ ॥
काष्ठान्तकुम्भीन्द्रसुकुम्भमण्डलमण्डायमानस्तवनाग[२]सम्भवैः । दुष्टं वृत्तम् ।
आस्तिक्यकार्त्तस्वरभूषयान्वितः संदृश्यते नो सहसा तिरोहितः ॥ २८ ॥ स इति पाठ्यम् ।
पाखण्डखण्डनपरत्वकृताभिमानः सद्दानदातृगणनाप्तपुरोऽभिधानः ।
धैर्य्यासिनिर्जितविरोधिकुवाच्यसेनो हाहन्त हन्त भुवने स विराजते नो॥२९॥
त्वं देवभूयं[३] मयि तात विहाय दासम्मामत्र हन्त कथमेकक एव यातः ।
किं [४]साम्प्रतं व्यवहृति र्ध्रियते जनेऽस्मिन्बालेऽपि साम्प्रतमियं भगवं स्त्वदीया
यो मां सदा करुणयात्रभवान्कृपालुः क्रोड़े निधाय विविधै रशनैः प्रतीक्ष्य[५] ।
प्रातोषयत्सनिपुणं परमार्थदृष्टि र्हेतोः कुतोऽद्यभजते स पराङ्मुखत्वम् ॥ ३१ ॥

एवं स तं सकलपुण्यगुणैः परीतं–
सूच्छ्वनलोचनयुगो विललाप शोचन् ।
सद्बोधवानपि जनो हितविप्रयोगे
स्वस्थो न तिष्ठति मना गिति किं न युक्तम् ॥ ३३ ॥
इत्थं विलापजनितास्रनिरुद्धदृष्टिम्–
मन्युप्रवेगपरिपूरणमन्यमन्वः ।
कश्चिद्बुधोविबुधतुल्यगुणप्रशंस–

---

१ गांगेयंसुवर्णम् —स्वर्णं सुवर्णं कनकं हिरण्यंहेमहाटकम् – इति अमरः । तपनीयंशातकुम्भगांगेयंभर्मकर्बुरमित्यमरः । २ सिन्दूरं नागसम्भवम् ॥ ३ देवभूयं देवत्वम्–पञ्चत्वमितिभावः । ४ युक्तार्थमधुनार्थचसां प्रतंतद्विदोविदुरिति त्रिकाण्ड शेषः । ५ प्रतीक्ष्यः–पूज्यः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्तं सान्त्वयन्निति जगाद सुगाद मात्तः ॥ ३४ ॥

उत्पत्तिमन्नहि सदा किमपीह वस्तु–
सन्तिष्ठते जगति पुत्रक मा स्म शोचीः ।
एवं विनाशमपि याति न जन्महीनं–
सिद्धान्त एष विदुषां निगमानुकूलः ॥ ३५ ॥

सोत्पत्तिकं यदिति संहननं विनष्टं–
प्राणी तु यातिविलयं न कदापि नित्यः ।
विज्ञाय चेति न मनागपि सौम्य शोकं–
कुर्या बधान धृतिमातनुयाः स्वकृत्यम् ॥ ३६ ॥

संसार एष ननु नाटककल्प एव–
जीवा यतो विविधयोनिषु भूमिकासु ।
नृत्यन्ति हन्त नितरां क्रमशोऽवतीर्य–
तस्याज्ञया [1]शतधृते र्गुरुनायकस्य ॥ ३७ ॥

एवंप्रकारक मसौ कथनं हितस्य विज्ञानतत्त्वजलधौ कृतमज्जनस्य ।
श्रुत्वा शुचाऽतलपयोधि मथो कथञ्चि[२]दुत्तर्तु माप धृतिपोत मपोतभावः ३८
तस्यान्तर[३]क्षसमभूमितलप्ररूढवैराग्यपादप उपागमदाशुवृद्धिम् ।
यद्भावितद्भवति कोऽत्र विचारचारः संसार[४]सार इह वाभिमतःससारः ३९
मित्रैरभाणिसरलात्मयुतैः कदाचिन् निर्विण्णता मुपगतोऽसि सखे कथं त्वम्।
कार्य्येषु सम्प्रति यतो नकरोषिचित्तमावश्यकेष्वपिचिराद् वदकारणं किम् ४०
तेषां निशम्य वचनं सविचक्षणोऽपि स्वाकूतगोपनपरो न जगाद हृद्यम् ।
पूर्वं चिराय परमाहु रमुं पुन स्ते भूयो यदाप्रतिबभाण तदा स्वचित्तम् ॥४१
मृत्युः समान्सहृदयाः सुहृदो दयायाःशत्रुः करोति कवली बलिनोऽपि जन्तून्
आत्मान मिच्छति जनोऽयमितोऽद्यचण्डाद् गोपायितुं भगवतःसविधंसमेत्य

---

१ भवेच्छतधृतिः पुंसि शक्रे च परमेष्ठिनि, इतिमेदिनी ।

२ उत्तर्तु मितिप्रयोग आर्ग्शास्त्रमनित्यमितिपरिभाषावला त्सागरं तर्तु-कामस्येतितन्त्रवचनानुसारी साधुः । ३ अन्तरक्षंमनः ४सारो बले मज्जनि च स्थिरे न्याये च नीरे च धने च सारम् । बलेऽप्यवत्सार मुदाहरन्ति इतिविश्वः

CC-0. Prof. Satya Vrat Shastri Collection.

x पूर्वं यद्यपि समसनीयं ततो विशेषणान्तरमिति मतं मम।

Digitized by Arya Samaj Foundation Chennai and eGangotri

सांसारिकेषु विषयेष्ववसानरम्यं पश्यामि नैकमपि सूक्ष्मदृशा वयस्याः ।
को बुद्धिमान् दहनदाहकशक्तिविज्ञ स्तत्रोच्छिखे [४]स्वककरं निदधीत चेतन ।
लब्ध्वापि मानुषशरीरमिदं विमूढाः किंपूरुषा न दधतेऽत्र यथावधानम् ।
मुक्तौ मनागपि तथा किमये महेच्छास्तद्वृत्तिनैव सुहृदो विदुषापि भाव्यम् ४४
[५]न स्वापतेयमखिलंविकलं मदीयं चित्तं प्रसत्तिततिभाक्तनितुं समर्थम् ।
प्रासादजात मपि जातु मनोभिलाषसम्पादने भजतिनो ६क्रममद्य किंचित्॥४५
ते सज्जनाः प्रणयगोपनवृत्तिवित्ता स्तत्तातसन्निधिमुपेत्य ततः सखायः ।
तस्यावधारितमतं प्रजगुः समस्तं प्रेयोवियोगमथवानुभवेत् स्वयं कः ॥४६॥
सूनो रुदन्त मवगम्य चिरन्तदानीं शोकाकुलः समजनिष्ट स वाडवेन्द्रः ।
दारक्रियामपि च तस्य निरोधहेतुं मत्वा चकार यतनं स तदेष्टसिद्धौ ॥ ३७
मित्रादिकैः कथमपि वृतिनां वरेण्यः तातं प्रबोध्य करपीडनपीडनात्सः ।
संरक्षितः पठनकार्य्यमना मनस्वी जातो बभूव विमलागमसारतृषः ॥ ४८
किंचित्समाप्य समयं स च दूरदर्शी तत्रैव लौकिकपदार्थगतस्पृहोऽपि ।
वाराणसीं प्रति पुनर्गमनाभियोगे चक्रेरुचिं रुचिरभावसमेतचेताः ॥४९॥
वृत्तं तदीय मुपगम्य कुटुम्बिलोकै श्चिन्ता व्यधायि नितरां कृतभूरिशोकैः ।
काशीं न याहि पठ सर्वनिबन्धजातमत्रैव पुत्रक ! पिता तमवोचदुच्चैः ॥
कार्य्योपयोगि पठितं समभूत्त्वदीय मेतावतैव कुरु कृत्यमये निजं त्वम् ।
सूनो ! जहीहि हठितामिदम स्मदीयं मन्यस्व युक्तकथनं यदि भावुकेच्छा ५१
सम्पत्तयो भगवता जगदीश्वरेण यास्ते कृते ननुकृताः करुणालयेन ।
तासा मवेहि सुत! भोगविधिं पुरस्तात् कुर्य्या मनोरथशतं सफलं च पश्चात् ५२
बद्धाञ्जलिः स्वजनकस्य पुरो विनीतः स्थित्वा मनोहरवचाः स्वमतंजगाद ।
नैवं कदापि भवता कथनीयमार्य्य ! शास्त्रप्रतीपवचनं वचनीयभावम् ॥ ५३
विद्याधनं भवति भूसुरसत्तमानां मुख्यं तदेव भवता प्रतिषिध्यते किम् ।
शास्त्रप्रबोधशुचिमानसकोपि [१]चेन्ना नाम्नायपद्धतिपरोऽपर एव कःस्यात्

---

४ उद्गतज्वाले । ५ स्वापतेयं—धनम् । ६ क्रमं—शक्तिम्, क्रमश्चानुक्रमे शक्तौ कल्पे चाक्रमणेऽपि चेति मेदिनी । ७ अभियोगे—उद्योगे ।

१—ना नरः—मनुष्योमानुषो ना विट् मनुजो मानवः पुमानिति हैमः।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

धर्मं विहाय मनुजः किमु कोऽपि भव्यं प्राप्नोति तात ! भुवने कथनीयमेतत् ।
किं धर्मशास्त्रकथनेपि तवाद्य नास्था यत्तद्विरुद्धमुपवर्णयितुं प्रवृत्तः ॥ ५५ ॥
वाराणसं यदि नवा गमनं भवद्भ्यःसंरोचते करुणया क्रियतां प्रबन्धः ।
अत्रैव देवचरणै र्विदुषः समीपे कस्यापि यत्र मम वाञ्छितमस्तुसिद्धम् ५६॥
इच्छानुकूलं प्रबन्धं सुतस्य सोऽथाशु चक्रे सनीडे बुधस्य ।
कस्यापि सच्छास्त्रसिद्धान्तवेत्तुः समारब्ध कार्येविलम्बो भवेत्क ! ॥५७॥
ततः शास्त्रराद्धान्तजातं विचार्य्य शमी शान्तबुद्धे श्चिरेणैव भूरि ।
कदाचिज्जगादाग्रतोनम्रभावः [१] स्वकाकूतमेकान्तभाजं गुरुं सः ॥ ५८॥
गुरो ! मुक्तिमार्गंनु [२] वावश्यमानःसमक्लेशविध्वंसहेतुं ध्रियेऽहम् ।
मयाऽज्ञायि सर्वोऽपि संसारएष गुरुव्याधिधामेति निष्क्रान्तिमीहे ॥ ५९ ॥
समुद्वाहितं मां पिता हन्त कर्तुं मुधा वाञ्छति प्रेमपाशाक्तचेताः ।
मयाऽकारि पूर्वं निषेधोऽपिभूरिः परं मन्यते मे वचो नैव सूरिः ॥६०॥
इतो गन्तु मिच्छामि योगं[३] वगन्तुं कुतश्चिद्वने योगितो योग्यरूपात् ।
यत स्तं विना नात्मतत्वप्रबोधो बुधै श्चाऽपिकर्तुं नवा जातु शक्यः ॥
श्रुत्वाऽपि तस्याभिलाषं प्रकाशं नाख्यात्तदानीं तदर्थं स किञ्चित् ।
विज्ञानवान् धैर्य्यसिन्धुस्त्वरावा न्नो जायते काऽपिकार्य्ये विचार्य्ये ॥६२॥
कार्य्यान्तरे तं विनियोज्य विज्ञो विद्यार्थिनं तस्य पितुः समीपे ।
स प्राहिणो त्तत्क्षणमेव कश्चित्स[४]माद्यति प्राज्ञजनोपि कश्चित् ॥६३॥
विज्ञाय पुत्रकविचारविसारसारमानाय्य शीघ्रमुपकण्ठमसौ सुविप्रः ।
उद्वाहमाकलयितुं लघु तस्य यत्नश्चक्रे समृद्धिततिभागधिशेमुषीकः ॥६४॥
चेष्टामिमां व्रतिवरो जनकस्य तावद्दृष्ट्वाऽतिदुःखजलधौ निममज्ज शान्तः ।
कष्टं व्यलोकि न मनागपि वन्धुलोकै स्तत्तस्य हन्त भवितव्यतया तदानीम् ६५

असारःसंसारः सकलविधुरावाप्तिसदनं
कथं मुग्धोभूत्वा व्यसनपरतायां स्वसमयम् ।
स्वयं नष्टंकुर्यांसमचगतलोकव्यवहृति
रनन्धः कः कूपे पतति मतिमान् स्वस्थकरणः ॥६६॥

१—आकूतं त्वभिप्रायइतिवैजयन्ती । २—वावश्यमानो भृशमिच्छन् ।
३—अवगन्तुम्—आगुरमिते ऽकारलोपः । ४—नप्रमाद्यतीतिकाकुः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विवाहे सञ्जाते कथमपि नहीच्छा फलवती,
भविष्यत्यस्माकं विविधकुलचिन्ताऽऽकुलतया ।
वृतध्वंसे पापं भवति नितरां दुःखजनकं,
विधातव्या वृज्या बहिरित [३]इतेन कचिदतः ॥६७॥
इतिकृतविचारो ग्रीष्मकाले कदाचि,
त्स्मृतभुवननाथः सर्वसम्पत्तिपूर्णम् ।
गृहमथ निशायां मुक्तिमार्गं यियासु,
स्तृणमिव परित्यज्योत्तमेच्छः प्रतस्थे ॥ ६८ ॥

इति तृतीयो विन्दुः ॥

३ *इतेन—गतेन ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ मुनिचरितामृते चतुर्थो विन्दुः ॥

अथ पुरं प्रविहाय दृढव्रतः सुवदनोऽत्रभवान्भवचिन्तकः ।
विजनभूमिमुपेत्य मुदाकुलः समजनिष्ट वटुव्रजपुङ्गवः ॥ १ ॥
तिमिरकाण्डपरीतदिशां निशां बहुलजम्बुकनादसमन्विताम् ।
प्रबलवातविधूततृणोच्चयां समवलोक्य गतो नहि विक्रियाम् ॥ २ ॥
प्रलयकालसमीरसमीरितो निरवधिर्जलधि र्बहुधा श्रुतः ।
कठिनकालमवाप्य तपस्विनः किमु भवन्ति कदापि तपस्विनः(१) ॥ ३ ॥
उडुपराजमुखच्छविरेककः पथि विचारमसौ विविधं परम् ।
विरचयन् गजराजगतिस्ततः स्वपुरतो बहुदूर मलीयत ॥ ४ ॥
स्थगितसंहननों हनुमन्मठे क्वचिदयं खलु संवसथेऽकरोत् ।
निशि निवासमहीनपरिश्रम स्तनुत एव रुचिं विरतौ समः(२) ॥ ५ ॥
विहितभूरिशुचा (३)विरुचा ह्यथोदशदिशः प्रहिताःप्रहितास्ततः ।
तमवलोकयितुं जनकेन वा प्रथितवाहनसाधनका जनाः ॥ ६ ॥
प्रतिपथं प्रभुकृत्यविचक्षणाः प्रतिवनञ्च विभज्य तदीक्षणम् ।
विदधिरे बहुश स्तरलेक्षणाः (४)परमते(५)रमते(६)ररमग्रतः ॥ ७ ॥
तदवलोकनजातपरिश्रमाच्छिथिल(७)विग्रहशक्तिकलापकाः ।
अहह दुःखपरम्परया युताः प्रतिनिवृत्य ततः पुर मागताः ॥ ८ ॥
अनुपलब्धिवशाद्वशिनः पिता विधुरमापदमुष्य सवंशजः ।
विधिविधि र्बलवा निति चिन्तयन्कथमपि प्रययौ वथ धीरताम् ॥ ९ ॥
सुतवियोगविनिश्चयकारणा त्पतिपराकपरा जननी ततः ।
भुवि पपात विचेतनतां गता व्यसु (८)रिवाशुवताऽर्भकवत्सला ॥ १० ॥
शिवशिवेति रटन् कुलमानवः सकल एव निरीक्ष्य पतिव्रताम् ।
झटिति तां समया कृतरोदनः समुपयात उरीकृतसौहृदः ॥ ११ ॥

१—शोच्याः, व्रतिशोच्यौ तपस्विनौ, इतिपुरुषोत्तमः । २—सर्वः, सर्वसाधु समानेषु समंस्यादभिधेयवदिति मेदिनी । ३—निष्कान्तिना । ४—पराश्रेष्ठामतिर्यस्यतस्य । ५—ए विष्णौमतिर्यस्यतस्य । ६—अरम्—शीघ्रम् । ७—विग्रहःशरीरम् । ८—व्यसुरिव मृतेव ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नयनवाः पृषताक्तदृशोऽबलाः क्षितितले स्म लुठन्ति रुदाकुलाः ।
सहृदयाः सदयाः सकृदागतास्तदुपकण्ठमनिन्द्यगुणान्विताः ॥ १२ ॥
कलकलध्वनिना गुरुणा गृहं तदनु वापितरां विषमं समम् ।
बहुविलापकलापमहो जनाः प्रथयितुं प्रबभूवु रनेकशः ॥ १३ ॥
हितजनाऽऽकलिताप्तचिकित्सया चिरमुपेत्य सुचेतनता मपि ।
प्रबलभीतिविभीतमना इव प्रलपनं कुरुते स्म ततो नु सा ॥ १४ ॥
समवलम्ब्य कदाचिदसौ करे परिजनं निजगाद समीपगम् ।
कमपि मुग्धदशावशमानसा स्खलितवागतिशोकवती सती ॥ १५ ॥
अयि सुत क्व गतोऽसि ममान्तिकाद् विनय विज्ञवरोऽपि विनाज्ञया ।
किमधुनापि विमुच्य विनिष्ठुर क्वचिदुपैष्यसि हन्त यदृच्छया ॥ १६ ॥
[१]मठति केवल सूनुरितः पिता (२)स्थलति मे जननी खलु काचन ।
क्षियति बन्धुजनोऽ पि विनिर्दय ! त्वमिति वेत्सि नवा किमु पुत्रक ॥ १७
त्वयि तिरोहित आश्रियते कुलं सकल मेव कथं व्यसनाकुलम् ।
किमवगच्छसि नेति हठिन्पुरः कुटिलभाव तनूज ! वदेरदः ॥ १८ ॥
कथय मूढ ! (३)लघु त्वमयेऽधुना स्वकमुदन्तमनाकुलमन्तिके ।
मम कथं विहितं विहितं त्वया गमन मद्य कुतश्च समागतम् ॥ १९ ॥
भजसि मौनमहो कथमुत्तरे भयमुपैषिकुतो(४)युतभाषणे ।
त्वमयि मूढगणाधिपते कथं भवसि मूक इतो मम सन्निधौ ॥ २० ॥
तव विवाहतिथिश्च सुनिश्चितः प्रकटितश्च समस्तजनेष्वपि।
तदुपयोगिपदार्थसुसञ्चितिः समभवद्वविभवानुगुणाऽगणा ॥ २१ ॥
सकल एक कुटुम्बिजनोऽधुना परिचितैः प्रतिपालयतिक्षणम् ।
सकुतुकास्तववत्स ! विवाहजं त्व मुपयासि कथं विपरीतताम् ॥ २२ ॥
गुरुनियोग(५) करस्त्व महो जनैर्नगरवासिभिरिद्धमतिस्तथा ।
(६)कलमभाव ! कथं समुदीर्य्यसे व्यवहरन् हि मुधापि नलज्जसे ॥ २३ ॥

१—मठ मदनिवासयोरितिधातोरूपम् । २—स्थलति तिष्ठति । ३—लघु शीघ्रम् जवोऽथशीघ्रंत्वरितं लघु क्षिप्र मरं द्रुतमितित्रिकाण्डकोशः ४—युतोयुक्तेऽ पृथग्भूतेक्लीबंहस्ते चतुष्टये, इति मेदिनी ॥ ५—नियोगकर आज्ञाकारी ।
६—कलमभावः चौरभावः —कलमा लेखनीचोरशालय इतिपुरुषोत्तमः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ मुनिचरितामृते चतुर्थो विन्दुः ॥

अथ पुरं प्रविहाय दृढव्रतः सुवदनोऽत्रभवान्भवचिन्तकः ।
विजनभूमिमुपेत्य मुदाकुलः समजनिष्ट वटुव्रजपुङ्गवः ॥ १ ॥
तिमिरकाण्डपरीतदिशां निशां बहुलजम्बुकनादसमन्विताम् ।
प्रबलवातविधूततृणोच्चयां समवलोक्य गतो नहि विक्रियाम् ॥ २ ॥
प्रलयकालसमीरसमीरितो निरवधिर्जलधि र्बहुधा श्रुतः ।
कठिनकालमवाप्य तपस्विनः किमु भवन्ति कदापि तपस्विनः(१) ॥ ३ ॥
उडुपराजमुखच्छविरेककः पथि विचारमसौ विविधं परम् ।
विरचयन् गजराजगतिस्ततः स्वपुरतो बहुदूर मलीयत ॥ ४ ॥
स्थगितसंहननो हनुमन्मठे क्वचिदयं खलु संवसथेऽकरोत् ।
निशि निवासमहीनपरिश्रम स्तनुत एव रुचिं विरतौ समः(२) ॥ ५ ॥
विहितभूरिशुचा (३)विरुचा ह्यथोदशदिशः प्रहिताःप्रहितास्ततः ।
तमवलोकयितुं जनकेन वा प्रथितवाहनसाधनका जनाः ॥ ६ ॥
प्रतिपथं प्रभुकृत्यविचक्षणाः प्रतिवनञ्च विभज्य तदीक्षणम् ।
विदधिरे बहुश स्तरलेक्षणाः (४)परमते(५)रमते(६)रमग्रतः ॥ ७ ॥
तदवलोकनजातपरिश्रमाच्छिथिल(७)विग्रहशक्तिकलापकाः ।
अहह दुःखपरम्परया युताः प्रतिनिवृत्य ततः पुर मागताः ॥ ८ ॥
अनुपलब्धिवशाद्वशिनः पिता विधुरमापदमुष्य सवंशजः ।
विधिविधि र्बलवा निति चिन्तयन्कथमपि प्रयया वथ धीरताम् ॥ ९ ॥
सुतवियोगविनिश्चयकारणा त्पतिपराकपरा जननी ततः ।
भुवि पपात विचेतनतां गता व्यसु (८)रिवाशुवताऽर्भकवत्सला ॥ १० ॥
शिवशिवेति रटन् कुलमानवः सकल एव निरीक्ष्य पतिव्रताम् ।
झटिति तां समया कृतरोदनः समुपयात उरीकृतसौहृदः ॥ ११ ॥

१—शोच्याः, व्रतिशोच्यौ तपस्विनौ, इतिपुरुषोत्तमः । २—सर्वः, सर्वसाधु समानेषु समंस्यादभिधेयवदिति मेदिनी । ३—निष्क्रान्तिना । ४—पराश्रेष्ठामतिर्यस्यतस्य । ५—ए विष्णौमतिर्यस्यतस्य । ६—अरम्—शीघ्रम् । ७—विग्रहःशरीरम् । ८—व्यसुरिव मृतेव ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नयनवाः पृषताक्तदृशोऽबलाः क्षितितले स्म लुठन्ति रुदाकुलाः ।
सहृदयाः सदयाः सकृदागतास्तदुपकण्ठमनिन्द्यगुणान्विताः ॥ १२ ॥
कलकलध्वनिना गुरुणा गृहं तदनु वापितरां विषमं समम् ।
बहुविलापकलापमहो जनाः प्रथयितुं प्रबभूवु रनेकशः ॥ १३ ॥
हितजनाऽऽकलिताप्तचिकित्सया चिरमुपेत्य सुचेतनता मपि ।
प्रबलभीतिविभीतमना इव प्रलपनं कुरुते स्म ततो नु सा ॥ १४ ॥
समवलम्ब्य कदाचिदसौ करे परिजनं निजगाद समीपगम् ।
कमपि मुग्धदशावशमानसा स्खलितवा/गतिशोकवती सती ॥ १५ ॥
अयि सुत क्व गतोऽसि ममान्तिकाद् विनय विज्ञवरोऽपि विनाज्ञया ।
किमधुनापि विमुच्य विनिष्ठुर क्वचिदुपैष्यसि हन्त यदृच्छया ॥ १६ ॥
[१]मठति केवल सूनुरितः पिता (२)स्थलति मे जननी खलु काचन ।
क्षियति बन्धुजनोऽ पि विनिर्दय ! त्वमिति वेत्सि नवा किमु पुत्रक ॥ १७
त्वयि तिरोहित आश्रियते कुलं सकल मेव कथं व्यसनाकुलम् ।
किमवगच्छसि नेति हठिन्पुरः कुटिलभाव तनूज ! वदे रदः ॥ १८ ॥
कथय मूढ ! (३)लघु त्वमयेऽधुना स्वकमुदन्तमनाकुलमन्तिके ।
मम कथं विहितं विहितं त्वया गमन मद्य कुतश्च समागतम् ॥ १९ ॥
भजसि मौनमहो कथमुत्तरे भयमुपैषिकुतो(४)युतभाषणे ।
त्वमयि मूढगणाधिपते कथं भवसि मूक इतो मम सन्निधौ ॥ २० ॥
तव विवाहतिथिश्च सुनिश्चितः प्रकटितश्च समस्तजनेष्वपि।
तदुपयोगिपदार्थसुसञ्चितिः समभवद्विभवानुगुणाऽगणा ॥ २१ ॥
सकल एक कुटुम्बिजनोऽधुना परिचितैः प्रतिपालयतिक्षणम् ।
सकुतुकास्तववत्स ! विवाहजं त्व मुपयासि कथं विपरीतताम् ॥ २२ ॥
गुरुनियोग(५) करस्त्व महो जनैर्नगरवासिभिरिद्धमतिस्तथा ।
(६)कलमभाव ! कथं समुदीर्य्यसे व्यवहरन् हि मुधापि नलज्जसे ॥ २३ ॥

१—मठ मदनिवासयोरितिधातोरूपम् । २—स्थलति तिष्ठति । ३—लघु शीघ्रम् जवोऽथशीघ्रंत्वरितं लघु क्षिप्र मरं द्रुतमितित्रिकाण्डकोशः ४—युतोयुक्तेऽ पृथग्भूतक्रीबंहस्ते चतुष्टये, इति मेदिनी ॥ ५—नियोगकर आज्ञाकारी ।
६—कलमभावः चौरभावः —कलमा लेखनीचोरशालय इतिपुरुषोत्तमः ।

CC-0. Prof. Satya Vrat Shastri Collection.

+ धर्मस्य तत्त्वमित्यर्थः
धार्मिकमिति न भवति। धर्मा च रत एव साऽऽख्या।

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुतवियोगविशोच्यगतिः सती कथनमेवमथो दधती तदा ।
निजसुतभ्रमतोऽन्यजनं प्रति परिजनैः कुशलैः प्रतिबोधिता ॥ २४ ॥
क्व नु गता तव बुद्धिविशालता क्व सखि धीरतया विहितो [१]गमः ।
व्यवहृतिं विदधासि यतोऽधुना कुमतिभागिव हन्त विचक्षणे ! ॥२५ ॥
विपदि दुःखिमनाः सुमनास्तथा भवति सम्पदि यःपुरुषो भुवि ।
सति ! वदन्ति विमूढधियं बुधा स्तमिह धार्मिकतत्त्वविदः सदा ॥ २६ ॥
विमलबुद्धिरये खलु तावकः सकलधर्मविचारविदांवरः ।
किमु कदापि कुकर्मपदे पदं स निदधीत सुदृग्गुणिपुङ्गवः ॥ २७ ॥
यदवगच्छति युक्ततरं धिया तदिह धीरजन स्तनुतेतमाम् ।
तदितरस्तु सदा कृतकार्यताफलविचारपरो हि विषीदति ॥ २८ ॥
उचितमेव विचार्य्य स सज्जनः प्रतिदिनं कुरुते [२]विधिवद्ध विधिम् ।
किमपि कार्य्यमित स्तनितुं क्वचित् स च भविष्यति सूनु[३] रितस्तव॥२९॥
यदि विरक्तिमता विहितं क्वचिद्ध गमनमद्य विमुक्तिपदेप्सया ।
तदपि मन्यु रसौ नहि शोभते सुतिनि ! ते सुतभावुककण्टकः ॥ ३० ॥
विरल एव कदाचिदिह क्षितौ जनिमुपैति जनः शुभकामनः ।
भवति संसृतिबन्धनतः पृथक् परमसौख्यनिमित्तमतस्तु यः ॥ ३१ ॥
तनुजशर्म्मनिमित्तमहर्दिवं प्रयतते जननी जगतीतले ।
सखि ! कथं जडधीवदये मनो मलिनमातनुषे तदुपस्थितौ ॥ ३२ ॥
प्रबलपुण्यवशाज्जननी सुतं जनयति प्रभुभक्तिरुचिं शुचिम् ।
त्वमिव धन्यतरा विरला क्वचित् सखि ! भविष्यति पुत्रवती सती ॥ ३३ ॥
बहि रसौ विधुरं सरलाकृतिः क्वचिदुपैष्यति मत्तनुजो वने ।
इति विचार्य्य विरोदिषि चेद्वरा भगवतीत्यपि नास्ति विचारणा ॥३४॥
सृजति यो भुवनं निखिलं विभुः शतधृतिः शतधा परिरक्षति ।
असुभृतो विधिवत् करुणामयः किमिति वेत्सि नवात्र पतिव्रते ॥ ३५ ॥
कथय गर्भगतं परिपालितं रचयति प्रतिभागुणसंयुतः ।
क इह देहिनमीश्वर मन्तरा स्वपिति किं भगवानधुनैव सः ॥ ३६ ॥

१—गमोगमनम्, यात्राव्रज्याभिनिर्याणप्रस्थानं गमनं गमइत्यमरः ।

२—विधिर्नो नियतौ कालेविधाने परमेष्ठिनीतिमेदिनी ॥ विधिर्ब्रह्मविधानयोः विधिवाक्ये च दैवे च प्रकारे कालकल्पयोरितिहैमः । ३—इतः—गतः ।

CC-0 Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपरमेव विबोधयितुं क्षमं किमिति ते मतिवैभव माश्रितम् ।
अलमलं प्रमदाकुलपण्डिते विततयाऽनवधानतया ऽनया ॥ ३७ ॥
सकल एव जनोऽपरबोधने पटुमतित्वविकासनचातुरीम् ।
वहु बिभर्त्ति निरक्षरको ऽपि वा मुखरताऽवसरे हि परीक्ष्यते ॥ ३८ ॥
ब्रूते यत्र परेशपरः सुखं कृतिवरः पुरुषोऽत्र विनिस्पृहः ।
अखिलमेव तदीयकुटुम्बितां परिदधाति जगन्ननु सर्वदा ॥ ३९ ॥
अपरदुःखनिराकृतितत्परः कपटरीतिपयोधरमारुतः ।
प्रणवभक्तिभटो जितमन्मथः कुह चिदेति पराभव मालि ! किम् ॥ ४० ॥
त्यजति यो मनसापि जन [१]श्चुरां तमुपयान्ति वसूनि खलु स्वयम् ।
कथयतीति पतञ्जलियोगिराट् शुभकृति र्महि दुर्गतिमेति वा ॥ ४१ ॥
मदनवाण[२]निमित्त मभू न्नवा य इह वीरतमो जितवासनः ।
कथमिमं प्रति कोऽपि कदाचन [३]प्रबलभीति रुपैष्यति कोपिताम् ॥ ४२ ॥
[४]यदवनं भगवाननुतिष्ठति प्रथितशक्तियुतः करुणामयः ।
निधनमातनितुं प्रभवे न्नरः क इह तस्य महामनसः सखि ! ॥ ४३ ॥
इति विचार्य्य विचारधने ! त्वया प्रतिविधानमरं सुमते शुचः ।
सुनिपुणं [५]भरुभावुकभाविनि विरचनीय मवश्यमये सखि ! ॥ ४४ ॥
अनुभवन्ति महाव्यसनं पुन स्तव दशामवलोक्य कुटुम्बिनः ।
विधुरसन्ततिभाजमलं हिताः प्रियजनं क्व निशामयितुं जनाः ॥ ४५ ॥
सुतविलोकनजातसुखं यदि पुनरपि प्रभुणा विधिना नु ते । ग्रन्थ षष्ठ्येवयुक्त
अभिमतं तदुपस्थितिभाजनं किमु भविष्यसि नो पतिदेवते ॥ ४६ ॥
विधिवशाद्यदुपस्थितमेव वा जनकृते ऽत्र भवेत्फलमत्र कः ।
तदपसर्पयितुं सुभगे क्षमो बलवतीह यतो भवितव्यता ॥ ४७ ॥
अपगमय्य नितान्तमिमां शुचां झटिति सम्प्रति धीरमते ! कुरु ।
गृहकृतिं, कृपया परमेश्वरो ननु विधास्यति तावकमङ्गलम् ॥ ४८ ॥

---

[१] अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानमिति योगसूत्रम् । [२] निमित्तं लक्ष्यं–भेद्यं लक्ष्यं निमित्तं च शरव्यं च समंविदुः, इति वैजयन्ती । [३] प्रबलाभीतिर्यतः स प्राणी [४]अवनम्–रक्षणम् । [५] भर्त्तृभरुर्मर्मकीलः प्राणनाथः सुखोत्सव इति पुरुषोत्तमः ॥

ग्रन्थान्ते पञ्चनदे गर्भमहरि- यस्मापभ्रंशो मर्तृवचनः प्रसिद्धः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विफलमेव रुदाकरणादिकं मनसि सम्यगिति प्रतिबुध्यताम् ।
विफलकार्य्यकरो बुधसंसदि व्रजति हास्यपदं सखि वा जनः ॥ ४९ ॥

एवं श्रुत्वा निपुणधिषणा युक्तरूपोपदेशं,
शोकावेशं कथमपिशनैर्धर्मबुद्धिर्निरास ।
स्मारं स्मारं विधिविधिवलं कार्य्यकार्य्यं च तेने,
सर्वः सर्वं जगति सहते दैवयोगाद्धि लोकः ॥ ५० ॥

इति चतुर्थो विन्दुः



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ मुनिचरितामृते पञ्चमो बिन्दुः

[१] मेधुरोथ स विधाय जागरं प्रातरेव शमवाञ् शुभाननः।
सद्गुरुं कमपि लब्धुकामकः प्रस्थितौ परिबबन्ध शेमुषीम् ॥ १ ॥
योगिवेशिपृथि धूर्तमण्डलं लोकवञ्चनगृहीतपाटवम् ।
[२] देवयुः प्रकृतिपेशलो वृती सोऽवलोक्य तदुपान्तगोऽभवत् ॥ २ ॥
तं प्रतार्य्य निजदेहभूषणं तन्ननाथ बहुरूपिणां कुलम् ।
साधुभावजनवञ्चनाविधौ कौशलं फलति मायिनां न किम् ॥ ३ ॥
तत्र दत्तनिजगात्रभूषणः सूनृतद्रविणसाधनस्ततः ।
[३] बन्धुराकृति रबन्धुबन्धुकः सायलेभिध[४]विखर्वटं गतः ॥ ४ ॥
कस्यचिद् गृहमुपेत्य वृन्दकं सज्जनस्य यमिनां स संहितम् ।
[५] देवदीपजितवारिजच्छवि स्तत्र वर्णिवर एष दृष्टवान् ॥ ५ ॥
प्राञ्जलिः प्रणतिमाकलय्य सः शारदेन्दुवदनोऽथ तत्कृते ।
तन्नियोगमुपलभ्य सादरं सभ्यतानिधिरुपाविशत् पुरः ॥ ६ ॥
कोऽसि तात ! कथमागमोऽधुना कोमलाङ्गकमनीयभाषण ।
त्वंकुतश्चसमयाऽत्रनोवदेःस्वीयवृत्तमितितै रभाषि सः ॥ ७ ॥ लोपः शाकल्यस्या सिद्धत्वं नादृतम् ।
सोऽप्यशेषमवदन्महामनाः सत्यवागथ (६) सुपेशलाकृतिः ।
वृत्तमत्रभवतोनताननो यन्निशम्य तुतुषुश्च साधवः ॥ ८ ॥
योगदीक्षणकृते विचक्षणं तत्र कञ्चन यतिं ततः परम् ।
प्रार्थयद्विमलमानसं हि सः प्राप्य काण्ड मवधानमेति [७]भुत् ॥ ९ ॥
शुद्धभावमवबुध्य तं यमी सम्यगाशु परमार्थदत्तधीः ।
नैष्ठिकव्रतिनमाततान वा योग्यता फलति सर्वदा सताम् ॥ १० ॥
नामधेयमपिशुद्धचेतनं [८] चारुबोधिरतिधार्मिकःपुनः ।
सोऽकरोन्निगमसारविज्जनो युक्तरूपमनुतिष्ठतीव वा ॥ ११ ॥

१—मेधावी मेधुरोमतइतिपुरुषोत्तमः । २—देवयुर्धार्मिकः सुकृत् । ३—मनोहराकारः चारु हारि रुचिरं मनोहरं वल्गु कान्तमभिरामबन्धुरे इतिहैमः । ४—विखर्वटो-ग्रामविशेषः ५—देवदीपस्तु लोचनामिति त्रिकाण्डशेषः ६—पेशलं हृद्यसुन्दरे इतिहैमः। ७—बुध्यते, इतिभुत्, विद्वान् । ८—बोधिः—बोधः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दण्डचैत्यमुख [१] रक्तचेलभृत्तत्र वासमकरोदकद्वदः ।
योगरीतिपरिनिष्ठतास्तये किं मुधा स्थलति धारणाधनः ॥ १२ ॥
नित्यमेव विजने वने क्वचिद् वृक्षमूलमुपगम्य संयमी ।
योगसिद्धिफलकामनः प्रभो–राततान भजनं वितन्द्रितः ॥ १३ ॥
एकदा तरुकुलायवासिनां पक्षिणां स हि निशम्य शब्दितम् ।
भूतभीतिगततत्त्वचिन्तनस्तत्क्षणं लघु[२]पलायित स्ततः ॥ १४ ॥
क्लैब्यमेतदपगम्य दूरतः स्वास्थ्यमापदचिरादनूनधीः ।
सिद्धिशालिपुरुषोऽपि वा क्वचित् खिद्यते हि चिरवासनावशः ॥ १५ ॥
कौशलं किमपि योगसाधने प्राप्य तत्रभवता विनिश्चयः ।
'कोटकांगड़' पुरं प्रति प्रति–ज्ञानुरूपकृतिना कृतस्ततः ॥ १६ ॥
एत्य तत्र समलोकयत् क्वचिद्वञ्चयन्तमबलामचञ्चलाम् ।
काञ्चनं व्रज मलज्जमास्थितं वैष्णवाख्ययतिनामधारिणाम् ॥ १७ ॥
हन्त साधुपदगौरवक्षितिं भारते ऽपि जनिमेत्य पापिनः ।
स्वार्थसिद्धिपरताजुषो जनाः साम्प्रतं हि बहुशो वितन्वते ॥ १८ ॥
आश्रमोऽयमखिलस्य नुः पुरा कर्म्मधर्म्मविधिदर्शको ऽभवत् ।
सोऽद्य धूर्तजनवासदूषितः किंकिमत्र विदधाति पातकम् ? ॥ १९ ॥
शोचयन्निति मुहुर्मुहुः स्थितस्तब्धचेष्ट इव सत्यसाधनः ।
शक्नुयान्नहि विलोकितुं स्वयं सिद्धरीतिविपरीतचेष्टनम् ॥ २० ॥
तं निशाम्य जिखिलाः खलाश्च ते कामरूपमथ मूढचेतसः ।
वीतरागमतिरागिताजुषो लोभरोगगतदृष्टयोऽवदन् ॥ २१ ॥
वेश एष भवतो न शोभते निन्दितोऽत्रभवतो महाशय ! ।
तज्जहीहि भगवन्नमुं वस मण्डले सुखमवाप्नुयाः सदा ॥ २२ ॥
व्यंसितोऽपि बहुधा स नागरः प्रार्थितोऽपि न मनाङ्मनोऽकरोत् ।
तत्र वस्तु मनघो ह्यसाम्प्रतं कर्तुमेव कथमुद्यतो भवेत् ॥ २३ ॥
विष्णुभक्तिपरतायुतो जन स्तापगन्धमुपयाति जातु न ।
लौकिकं सुखमपीश्वरेच्छया सर्वमेव लभते यथारुचि ॥ २४ ॥

१—चैत्यमुखः कमण्डलुः; कुसुम्भः करकश्चैत्यमुखः कमण्डलुः स्मृतइति-हारावली । २—शीघ्रम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

धौतवस्त्रयुगलं तु तद्धठा दन्यदेव खलु तेन धारितम् ।
वीतरागपुरुषोऽपि सङ्गतो रागभागिव विदृश्यते न किम् ॥ २५ ॥
सिद्धलोक सुविलोकनेच्छया सिद्धपूरपुरमेतु मीहया ।
प्रस्थितिं स कृतवान् ततो द्रुतं किं मृषा समययापनं स्मृतः ॥ २६ ॥
तत्पुरः पथि विरागिसंज्ञकः, कोऽपि भिक्षुक उपागमत् किल ।
(१)संस्तुतोऽस्य जनकस्य भव्यदृग्विस्मितोऽथ तमुवाच रोषयुक् ॥ २७
का दशा समजनिष्ट शङ्कर ! भ्राम्यसि त्वमिह निर्जने वने ।
मूढबुद्धिरिव यन्निरर्थकं त्वन्निभोपि बत हुं प्रमाद्यति ॥ २८ ॥
त्वां विनाद्य पितरौ नु तावकौ जिह्मभाव कथमिष्टसन्तती ।
मन्युकाण्डहतधैर्यसैनिकौ जेष्यतः किमिव मोहविद्विषम् ॥ २९ ॥
ज्ञातशास्त्रसमयोऽपि चेज्जनः स्वीयकार्यमपहाय भूतले ।
उद्धतस्त्वमिव संचरेत्कथं धर्म्मरीति रुपयान्न संक्षयम् ॥ ३० ॥ उपयायात् इति नक्तव्यम् ।
प्रेमवारिपिहिताम्बकद्वय श्चित्रिताङ्ग इव तस्थिवान् क्षणम् ।
बन्धुबन्धनमहो विलक्षणं ध्यानमाश्रमपि यस्य दुःखदम् ॥ ३१ ॥
सर्ववृत्तमथ तं निवेद्य स प्राज्ञवर्य इतवान्ततः पुनः । इतवांस्तत इति साधु
जाङ्गलीं समवलोक्यँश्छविं शीघ्रमेव खलु वाञ्छितं पुरम् ॥ ३२ ॥
नीलकण्ठमठमध्यवर्तिनां योगरीतिविदुषां महात्मनाम् ।
प्राप्य सङ्गमकरोद्यथेप्सितं मुक्तिवाप्तिविषयं विचारणम् ॥ ३३ ॥
तस्य वृत्तमधिगम्य तत्पिता तन्निनीषुरचिरेण किंकरैः ।
तत्र हन्त सहसाश्वसादियुक् तन्मठेऽगमदपत्यवत्सलः ॥ ३४ ॥
क्षिप्रमेव परिगृह्य हस्तयोः कोटपाल इव चौररूपम् ।
आत्मसत्त्व मवगन्तु मुद्यतं तं जगाद पुनरुग्रभाषणः ॥ ३५ ॥
पाप शङ्कर समुज्वलं कुलं दूषितं बत ममाद्य तेऽखिलम् ।
नीचवृत्ति मवलम्ब्य दुर्जन दूढ्य ! मां हसति यन्महाजनः ॥ ३६ ॥ दुर्धीः
क्रोधवान् सजलपात्र मग्रतः क्षिप्रमेव परिगृह्य खण्डशः ।
भूसुरो व्यरचयत्सवस्त्रकं तस्य शान्तमनसस्तपस्विनः ॥ ३७ ॥
निन्दनीयवचनै रनादरं सोऽकरोदथ यथेच्छमुच्चकैः ॥
शङ्करस्य जनको विनाप्यगः कोपितां नहि गत स्तथापि सः ॥ ३८ ॥

१—संस्तुतः परिचितः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पादयोश्च प्रणिपत्य साञ्जलिः साधितात्मविभवोऽपि नागरः ।
तातमाह वचनं सगद्गदं ज्ञातनीतिसमयो यथामति ॥ ३९ ॥
धूर्तलोककथनादहं पितः प्रस्थितोऽस्मि गृहतो निरर्थकम् ।
अर्भके मयि विधाय तद्दयां रोष एष भवता विसृज्यताम् ॥ ४० ॥
दुःखितोऽस्मि भगवन्नटाट्यया सर्वथाऽहमनया विमूढदृक् ।
मङ्क्षु मां जिगमिषुं नयेः पिटं यत्करोमि निजमातृदर्शनम् ॥ ४१ ॥
प्रत्ययो न मम तेऽस्ति सम्प्रति वावदूक कथने कथञ्चन ।
इत्युदीर्य तमुवाच किंकरान् स्वामिकार्य्यकुशलान् स तत्पिता ॥ ४२ ॥
यूयमद्य निशि दुष्टचेष्टनं [१]जागरित्वमुपगम्य रक्षत ।
भो यथावसरमत्र यत्क्वचिद् विद्रुतो भवतु नायमग्रतः ॥ ४३ ॥
वञ्चकोऽयमिति सौम्य किंकराः सम्यगस्य कुरुताऽद्य निग्रहम् ।
दुर्जनेऽपि किमु साधुवर्त्तनं जायतां शुभफलं कदाचन ॥ ४४ ॥
योऽपराधिपुरुषं प्रमादवान् वारमेकमपि हातुमिच्छति ।
सोऽपराध्यतितरां जगत्पतेः सम्मताविति सुनीतिसंस्थितिः ॥ ४५ ॥
मामकीनमयमद्य दुर्मतिः सर्वलोकविदितं महायशः ।
भिक्षुतामुपगतो रसातलं नेतुकाम इव चेष्टते भृशम् ॥ ४६ ॥
नायमेतु बहिरेककः क्वचिद् व्यंसकत्वमवलम्ब्य धूर्तकः ।
सावधानमनसा तथेक्षणं नक्तमस्य तनुताऽङ्ग सज्जनाः ॥ ४७ ॥
दुःखितोऽस्मि विहितो यथाऽमुना बान्धवैः सममहं दुरात्मना ।
किं न मेऽयमधुना तथा कुधीः क्लेशितो ननु विधीयतां बहु ॥ ४८ ॥
रक्षणेऽस्य विनियोज्य सेवकान् स स्वयं समविशन्महामनाः ।
वीतचिन्तपुरुषोऽभिवाञ्छति कः क्षितौ न शमनं महामनाः ॥ ४९ ॥
प्रसुप्ते तस्मिँस्ते कुशलधिषणाः सेवकजनाः
समस्ता भर्तुर्वै समजनिषत द्राक्सुनिपुणम् ।
नियोगे सँल्लग्ना विहितसमयाः सत्यमनसो
महाभागाऽऽज्ञानां क्षितिरिह भवेत्कुत्र जगति ॥ ५० ॥

इति मुनिचरितामृते पञ्चमोबिन्दुः ॥

अस्य वीतचिन्तः पुरुष इति पूर्वमेव साधीयः ।

१—जागरूकस्तु जागरीति हैमः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ मुनिचरितामृते षष्ठो विन्दुः



सम्प्राप्य बन्धनमसौ स्वपितुर्नि(१)योगा न्निर्बन्धधामसमवाप्तिकृतेऽधियत्नः ।
(२)पारीन्द्रशाव इव पिञ्जरमध्यवर्ती श्रीशङ्करश्चिरमशोचदशोच्यबोधः ॥१
येषां मयात्र बहुधावगता जगत्यां निःसारता खलु कथं विषयेषु तेषु ।
कुर्वे रुचिं कुमतिभागिव (३)तात(४)योगा त्सर्वः प्रियोभवति वात्महिताय लोकः
उत्पादकोऽस्ति जगतां परिपालको वा कारुण्यवारिधिरनन्तसुखस्वरूपः ।
यो नः पिता पृथुलधामयो महेश स्तत्सङ्गतिं कथमिवाद्य करोमि दीनः ॥३॥
हा हन्त हन्त परितः शयनं मदीयं पापोऽधुना भृतगणो विमणोऽनुवेलम् ।
जागर्ति दत्तनयनो मयि जिह्मभावस्तस्मादितःपदमपि प्रभुरस्मि नैतुम् ॥४॥
हे देव विघ्नहर पाहि दयार्द्रचेतो दीनं जनं शिव करोषि कुतो विलम्बम् ।
क्लेशाहिताहतधिया मयि दीनबन्धो ! बन्धु स्त्वमेव कथितोऽसि महानुभावैः॥
त्वामन्तरा नहि परेश ! सहायकोमे सामर्थ्यभागिह भवे भगवन् प्रतीतः ।
य स्त्रातु मर्हतु महामहनीयकीर्ति र्दुःखादितःप्रबलतः शिव साधिताहत् ॥६
दीनार्तिनाशकविभो ! (५)शरणं क्व यामि त्वामन्तरेण(६) करुणाकर! दुःखिचेताः
अव्या द्रुतं दुरित (७)दावदव ! त्व मीश ! नायं विलम्बसमयः समयज्ञवर्य्य
सदा सदानन्द(८)सदा ! भवान्तके त्वदन्तिके(९)केन कदा निवत्स्यते ।
विभो मया लब्धविमुक्तिसम्पदाऽऽपदास्पदत्वा(१०) मय सच्चिकित्सक ॥८॥
अनेकविघ्नानुभवोद्भवे भव ! भवामि भव्येतरभागभाग्यभृत् ।
अपारसंसारमरुस्थले स्थलँस्त्वदीयसंदर्शनवाःपिपासया ॥ ९ ॥

१—नियोगः आज्ञा । २—पारीन्द्रः केशरी तस्य शावः शिशुः,कण्ठीरव स्तु पारीन्द्र केशरी गजमाचल इति हारावली । ३—तातः पिता—तातस्तु जनकः पितेत्यमरः । ४—योगो युक्तिः संगो वा,योगोऽपूर्वार्थसम्प्राप्तौ संगतिध्यानयुक्तिषु इतिविश्वः । ५—शरणं रक्षितारम्, शरणं गृहरक्षित्रो र्वधरक्षणयो रपि,इति मेदिनी । ६—अन्तरेण—विना, अन्तरेण पदं विद्याद्विना मध्यार्थयोरपि,इति मेदिनी ७—दवो दाव-इव ख्यातो वनाग्निवनयोरपीति विश्वः । ८—सदा—सीदतीति सत् तेन,स्थिति मतेति भावः । ९ केन सुखेन—सुखशीर्षजलेषु कमिति मेदिनी १०—आमयो रोगः स्त्री रुजाचोपतापरोगव्याधिगदामयाः—इत्यमरः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

हरे हर त्वं भुवनोरुबन्धनं विबन्धनाऽरं कुरु मां सस(१)म्मदम् ।
अतः परं दुःखपरम्परां २परां न सोढुमर्हामि दयस्व दैन्यहृत् ॥ १० ॥
[३]पुण्यस्वरूपं जगदेकभूपं निःशेषसम्पत्तिजुषं महेश ! ।
त्वां स्वामिनं चाप्यवगम्य दीनो नो दुःखहीनोऽस्म्यतिचित्रमेतत् ॥ ११ ॥
हे नाथनाथ प्रभुणा सदैव त्वया मया[४]खाकलिताऽऽत्मयष्टिः ।
मुहुर्मुहुः पूर्वमयं जनः किं नारक्षि रक्षिप्रवराऽवतान्माम् ॥१२॥
मां पापिनं चे दवगम्य तावदुपेक्षसे मे कृपणव्यवस्थाम् ।
त्वं तर्हि किं (५)पापद एव नासि कस्माद्विभो ! शोच्यजनेऽनयस्ते ॥१३॥
मायाविनं चे दवगत्य माधव ! घृणां विधत्से मयि दूरदृक्तया ।
मायाविरूपं स्वयमेव भो घृणिन् जहीहि पूर्वं यदि ते विवेकिता ॥ १४ ॥
कथं प्रभो त्वां (६)जरठा महर्षयो वदन्ति कारुण्यरसैकमूर्तिकम् ।
यः शोकपाथोनिधिमग्नमानसे शोच्ये जने चाऽपिकरोष्युपेक्षणम् ॥ १५ ॥
सहस्रबाहो यदि रक्षितुं नो नो अर्हसि न्यायभृतां वरेण्य ! ।
स्वसेवकं चाथ कथं प्रसिद्ध स्त्वं तर्हि विश्वम्भरनामधारी ॥ १६ ॥
मदज्ञतारूपमहान्धकारके स्वरूपलुक्कायनचिन्तया यदि ।
विलक्षणात्यन्तमहो महेश्वर ! विशङ्कसे नेत्यपि साधुभावना ॥ १७ ॥
(७)ऋजीषपृष्ठाञ्जननूत्नवारिद तमालमालाच्छविभाक् तमोव्रजैः ।
चिरात्परीतापि गिरे र्गुहा क्षणं प्रकाशिता किं न भवेत्प्रदीपतः ॥ १८ ॥
नवो नयोऽयं भगवन् ! नयालय ! त्वदीय आभाति वरं वरोत्तम[८] ।
महा[९]महा यत्तु मदज्ञतातमः करोषि नोपारतमार्तपालक ॥ १९ ॥
सहस्रपाचा तव देव किंफला ऽऽहूतोऽपि नायासि यतो मदन्तिके ।

१—ससम्मदं सहर्षम्—प्रमद सम्मदौ हर्ष इति पाणिनिः । २—पराम्, अन्याम्-परःश्रेष्ठारिदूरान्योत्तरे क्लीबेन्तु केवले इति विश्वः । ३—पुण्यं मनोज्ञं यस्य तम्;पुण्यं तु धर्म्मे सुकृते त्रिषु पूतमनोज्ञयो,रिति मेदिनी । ४—आखः-खनित्रम् ॥ ५—पापं द्यति, ददाति वेति पापदः । —जरठाः६—जीर्णाः, जरठःकर्कशे जीर्णे, इति हैमः । ७ऋजीषं पिष्टपचनं मित्यमरः । ८—सर्वोत्कृष्ट इति भावः । ९—मह उत्सवतेजसो, रिति मेदिनी ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनेकनेत्रत्व मनर्थकं न किं [६]मारात्स्थितं चाऽपि यतो न पश्यसि ॥२०
[७]प्रत्यूहसन्दोहनिवृत्तिहेतो ! संसारपाथो[८]निधितुङ्गसेतो ! ।
हे देव विश्वेश्वर ! दीनभावं गोपाय मां मुग्धतरस्वभावम् ॥ २१ ॥
कालाद्ग वहोस्त्वत्तु वियुज्य मूढो रूढ स्तथा दुर्व्यसनोन्मदोष्ट्रे ।
तापत्रयीदावदुरासदे हा हा तात संसारदवे भ्रमामि ॥ २२ ॥
दुष्कर्म्मबाहुल्यमहान्धकारप्रलुप्तविज्ञानदृशोऽङ्ग तात ।
संसारकान्तार[९] इतोऽसहायः कामादिकव्यालवशो विरौमि ॥ २३ ॥
असङ्गरूपोऽपि समस्तसङ्गगो धृतात्यनूनाम्बर[१०]को दिगम्बरः ।
भवा[११]दृशो [१२]वामदृशोऽपि किं प्रभु र्भवेद्भवे [१३]नागहितः[१४]प्रजाहितः
प्रातः पिता गृहमनेष्यदयं समोहश्चेन्मां सुधाजनजनिं भुवनेऽभविष्यम् ।
संसारबन्धनवशान्न बुधोऽपिजातु स्वेष्टोपलब्धिकरणेसफलप्रयत्नः ॥२५॥
इत्थं विचारणपरस्य परस्य तस्य दोषावसानसमये समरक्षिवर्गः ।
तन्निर्गमावसरहेतुमिव क्षणेन निद्राङ्गनाङ्गसुखभुक्तिरुचिर्बभूव ॥ २६ ॥
निद्रासुखानुभवमग्नमनस्क मेष भृत्यव्रजं[१] समवलोक्य विलोक्यदेहः ।
शीघ्रं परेशकरुणास्मरणात्तचित्त [२]उच्चारलक्ष्य[३] मवलम्ब्य तदापयातः २७

६—आराद्दूरसमीपयोरित्यमरः । ७—प्रत्यूहो विघ्नः—विघ्नोऽन्तरायः प्रत्यूह इत्यमरः । ८—पाथोनिधिः—समुद्रः । ९—कान्तारं वनम् दुर्गमवर्त्म वा; कान्तारमुपसर्गादौ वने दुर्गमवर्त्मनि, इति विश्वः । १०—अम्बरं न द्वयो र्व्योम्नि सुगन्ध्यन्तरवस्त्रयो, रिति मेदिनी । ११—दृक्—बुद्धि र्दृष्टिश्च—दृक्स्त्रियां दर्शने नेत्रे बुद्धौ च त्रिषु वीक्षके, इति मेदिनी१२—वामं सव्ये प्रतीपे च द्रविणे चातिसुन्दरे इति विश्वः । १३—नागो मतंगजे सर्पे पुंनागे नागकेसरे क्रूराचारे नागदन्ते मस्तके वारिदेऽपि च देहानिलविशेषे च श्रेष्ठे स्यादुत्तरपदस्थित इति । १४....हितं पथ्ये गते धृते इति च हैमः ॥

१—व्रजः समूहः—व्रजो गोष्ठाध्वबृन्देषु, इति मेदिनी । २—उच्चारः—पुरीषम्, उच्चारावस्करौ शमलं शकृद् गूथं पुरीषं वर्चस्क मस्त्री विष्ठाविषौ,इत्यमरः । ३—लक्ष्यम्—अपदेशः, लक्ष्यं स्यादपदेशेऽपि शरव्येऽपि नपुंसकम् इति मेदिनी ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्भाव्य कल्यसमयं कलितात्मरोधः [४]कौसीद्यराक्षसनिराकृतिलब्धबोधः।
आत्मप्रगोपनकृते स समीक्षमाणः स्थानं जवेन [५]वरटाक्षतवत्ससर्प ॥ २८
आरात्पथः क्वचिदनेकसुदृश्यपूर्णं मुद्यान भूमिगतमीश्वरभक्तिकेतम् ।
एकं विलोक्य पुरतो धृतिमाप तूर्णंकीर्णं विचित्रघनशाखिगणेन वर्णी २९
नानाविहङ्गमकदम्बकुलायभूमेः सान्द्रच्छदावलिमनोज्ञप्रका[६] एडपङ्क्तेः
कारस्करस्य कथमप्यवलम्ब्य शाखां कस्यापि तस्य पटलं स समारुरोह ३०
कृत्यानि तत्र जनकस्य महोदयस्य कर्त्तव्यकार्यकरणोद्यमतत्परस्य ।
विज्ञातुमेव सहसाऽचलगात्रयष्टिः पाषाणखण्ड इव सुस्थिति माततान ।३१
सुप्तोत्थित स्तमवलोकयमान आरान्माराकृतिं कृतिवरो न यदाऽऽलुलोके।
[७]मन्युप्रवेगमपने तुमशक्नुवानः [८]प्रेष्याँस्तदा परुषवाक् स पिताऽऽजुहाव३२
पापाः स वञ्चकजनः पुरुषार्थशून्या[९]हुं काऽवृजद्वदत रे लघु वावदूकाः ।
मूकाः कुतो मठत मे पुरतोऽद्य हेतोः सुप्ताः समे कथमरे निभृतं कृतघ्नाः ३३
तद्वाक्शरावलिहतिव्यथितान्तरक्षा रक्षानियुक्तिविकलाः सकलाः सलज्जाः ।
आत्मप्रमादविषयेऽनुतपन्त इभ्य माश्वास्य तस्य निगृहीतिनिमित्त मीयुः ३४
निर्याय ते झटितिमार्गण मश्ववाराः कर्त्तुं ततश्च निखिला अपि सद्भुजिष्याः
तत्पादपद्मपदवी मनुढौकमानाः प्रापुः शिवालयमहो निपुणप्रबन्धाः ॥३५॥
अन्तर्विगाह मथ तत्र विधाय सम्यक् ते डिङ्गराः परिदृढार्थपरायणा वै ।
अन्वेषणां विदधिरे बहुश स्तदीयां सर्वेपि भव्यसदने गिरिजाधवस्य ॥३६
लब्धो यदा नहि वटुः कृतमार्गणै स्तै स्तत्रार्य्यजातिमणिरेष महाप्रभावः ।
कैवल्यपत्तनसुमार्गमपेक्षमाणः शोकाकुलै रजनि हन्त तदाऽतिमात्रम् ॥३७॥
तारस्वरेणवत[१०] कोऽपि रुरोद मूढः कश्चिच्छनै र्बहुविधंविललाप दीनम् ।
ओ शङ्कर! क्व गतवानसि निष्ठुर स्त्वं प्राहापरो गतधृतिः करुणास्वरेण ३८

४—आलस्यं निद्रा कौसीद्यमिति हैमः । ५—वरटा गन्धोली—भिड़ बर्र इति वा भाषायाम्—वरटा हंसयोषायां गन्धोल्यां वरटापि च इति विश्वः । ६—प्रेङ्खे वेति सूत्रेण संयुक्ताक्षराभ्यां प्रङ्खाभ्यां गुरुतां प्राप्तस्य पूर्वस्थस्य विकल्पेन पक्षे लघुभावः । ७—मन्युः क्रोधः—मन्यु र्दैन्ये क्रतौ क्रुधीति हलायुधः । ८—प्रेष्यान् सेवकान्, डिंगरः किंकरो भृत्य श्चेटो गोप्यः पराचितः दासः प्रेष्यः परिस्कन्दो भुजिष्य परिकर्म्मिणौ, इति हैमः । ९—हुं विक्रमेऽनुमतौ वार्त्तायां मिति, हुं वितर्के परिप्रश्ने, इति च पुरुषोत्तमहैमौ ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आगत्य मन्दिरमिदं न बहिः प्रयातः कुत्रापि भर्तृतनयो ननु भूमिपातः॥
तं ज्ञापये भगवतीति जगाद कोऽपि स्वाधिप्रयाष्टधिषणो नहि किं बुधोऽपि३९ न
हे देव शङ्कर ! वदे स्त्वमये कृपालो ! त्वत्केतनेऽपिभगवन् किमनर्थशङ्का ।
कान्तर्हितो भवति नः पुरतः कुमार स्तं देहि भोः करुणया जगदेकनाथ ॥४०
इत्थं वदन् मुहुरहो प्रतिदेवदेवं सोच्छ्वासमश्रुकणसिक्तकपोलभागः ।
द्वारं निरुध्य हनुवेशितसव्यपाणिः कश्चित्पुरोनिहितयष्टि[१]रुपाविशन्नाः४१
[२]पान्थानपृच्छदथ कोऽपि तत स्त्वरावांस्तं मानवानमितमन्युवशो हठीव ।
चिर्मं वदन्त्विति कुमार इतः क्व यातः केनाध्वना पथिक[३]पञ्चजनाः पुरस्तात् ॥
कश्चिच्चल[४]त्तरलदृष्टि[५]रमन्युमन्यु स्तत्रत्यमालिपुरुषं परुषं जगाद ।
रे[६]पुष्पलाव ! [७]ललिता[८]कृतिरत्रभर्तु रागान्मुतः सच कुतोऽपगतो वदाशु ॥
कीनाशवद्भयदवि[९]ग्रहमानतास्यो दृङ्नाग्रतः प्रबलभीतिरभीतिमाह ।
[१०]स्थाने न ते भयि महाशय ! कोप एष यद्यागतः सहिकियत्तिममात्रदोषः ४४
आलोकयन्तु कुशलं यदि मे कुटीरे लुक्कायितोऽत्रभवतां भवतां कुमारः ।
अन्तर्दधीतपुरुषो नहि दृष्टिभाजां सूचीव जातु पुरतो विमलप्रकाशे ॥४५॥
तेषामुहुः समवलोक्य विचेष्टितानि चित्रार्पिताङ्गक इव स्थितिभाग् बभूव ।

१०—बत खेदानुकम्पायां हर्षे सम्बोधनेऽद्भुत इत्यजयः। १—लगुडः, दण्डो यष्टिश्च लगुडो ना स्यादिति हैमः । २—अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिक इत्यमरः ३—पञ्चजनाः पुरुषाः, मर्त्यः पञ्चजनो भूस्पृक् पुरुषः पूरुषो नरः मनुष्यो मानुषो ना विड् मनुजो मानवः पुमान्, इति हैमः ॥

४—तरला चञ्चलादृष्टिर्यस्य सः, तरलं चञ्चले षिड्गे भास्वरे ऽपि त्रिलिङ्गकमिति मेदिनी । ५—अमन्युर्दैन्यरहितः (सातिशय इतियावत्) मन्युः क्रोधो यस्य सः--मन्युर्दैन्ये क्रतौ क्रुधि, इति हैमः ६—मालिकः पुष्पलावः स्यादिति पुरुषोत्तमः । ७—ललिता लडिताऽऽकृतिराकारोयस्यसः । ललितमीप्सिते लडिते हारभेदे चेति हैमः ।८--आकृतिः कथिता रूपसामान्यवपुषोरपीति विश्वः । ९—भयदो विग्रहो यस्य तम् । विग्रहः समरे काये विस्तारप्रविभागयोरितिमेदिनी १०--स्थाने तु करणार्थे च युक्तसादृश्ययोरपीति विश्वः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यद्वयक्तरूपकृतिमानपि तन्न[1] वाच्यं किं किं नया हि विपदात्तजनः करोति ।४६
श्रान्ताः कृतश्रमतया रजनीमुखे ते नैराश्यवन्हिपरिदग्धमनोरथागाः ।
विच्छायमानवदनाश्च ततः प्रचेलुः प्रारब्धभाजनजनस्य हि बन्धनं क्व ॥४७
यातेषु तेषु सकलेषु ततार धन्यः स्थानात्ततो [२]भवरतो भवदुत्तखिन्नः ।
धीरं विलोक्य पुरतः स ययौ त्वरावान् सन्दिग्धताविषय मिच्छति को विवेकी ।
त्यक्त्वा प्रसिद्धसरणिं [३]तरणिप्रभो यत् कध्यावलम्बनमधान्न न साम्प्रतंतत्।
आपन्निराकृतिपरो महनीयभावः कां कां न पद्धति पुपैति [४]नयागमज्ञः ॥
[५]शालामृगालिभपणानुमितप्रतोली [६]पालीविभावितसमायतविश्वभागम् ।
दीपावलीविदिततुङ्गनिकेतनाढ्यं क्रीडत्कुमारकमनोज्ञरवात्तगर्भम् ॥ ५० ॥
हिङ्गूपलाण्डुलशुनाचिततैलपूरव्याधारिशाकविसरोत्थितगन्धिवातम् ॥
ग्रामं समेत्य कमपि क्षुधयातिखिन्नः कस्यापि सज्जनजनस्य गृहे स तस्थौ ॥
स्नानं विधाय कृतवाञ्जगदीशभक्तिं पूर्वं ततोऽशनमसौ रचयाम्बभूव ।
विश्रम्य नक्तमपरेद्यु रियाय कल्ये कल्याणसाधनपरोऽमदवादपुर्य्याम्५२ ॥
ततो बडोदाख्यपरं प्रभावी सत्सङ्गलाभाय जगाम दान्तः ।
तल्लोचनासेचनकत्वमाशु विचाय्य सन्तुष्टमनाः स जज्ञे ॥ ५३ ॥
कुत्रापि चेतनमठेऽन्तसदां वरेण्यः साधूपकण्ठमगमन्निगमाध्वगामी ।
जिज्ञासुरीश्वरपदं विपदं समोदं स्थाने हि तादृशजनस्य भवन्ति यत्नाः ५४
वेदान्तशास्त्रसमयेऽजनि साधुलोकैः सम्भाषणं बहुविधं विमदं तदास्य ।
युक्तिप्रमाणसहितं रहितंहठादेस्तत्रातिकौतुकजुषो विदुषोऽतिकालम् ॥ ५५

यतिर्ब्रह्मानन्दः पृथुलधिषणः कोऽपि विबुधः
स्वबुद्धिप्रागल्भ्याद्वचनचतुरोऽथैनमकरोत् ।
अभेदं वेदान्तं प्रतिकृतरुचिंशुद्धमनसं
न किञ्चित्काठिन्यं भवति सरलव्यंसनविधौ ॥ ५६ ॥

१—नवाच्यम् नो निन्द्यम् । २—भवः सत्तासिजन्मसु रुद्रे श्रेयसि संसारे,इति हैमः । ३—तरणेर्भानोः प्रभेव प्रभा यस्य । ४—नीतिशास्त्रविज्ञः नयोनीतिद्यूतविशेषयोरिति मेदिनी । ५—शालामृगाः—सारमेयाः । ६—पाली पङ्क्तिः—पालीकर्णग्रेताग्रऽश्रौपङ्क्तायङ्कप्रभेदयोरितिविश्वः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहंब्रह्मास्मीतिप्रबलतरसर्गःश्रुतधरः
सदाचाराधारो धृतपरमसन्धोवररुचिः ।
सुहृद्गोष्ठ्यामोदं परमनुभवन् भावितमति—
श्चिरं तत्राऽऽवासं यतिजनसकाशं स्म कुरुते ॥ ५७ ॥

इति मुनिचरितामृते षष्ठो विन्दुः ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ मुनिचारितामृते ७मो विन्दुः

गत्वा तत्सविधे कदाचिदबला काशीपुरीवासिनी
साध्वी कापि परेशभक्तिनिरता प्राह प्रवासप्रिया ॥
(१)नानाशास्त्रविचारदक्षिणधियां कांचित्सभां नार्यदे
(२)तीरेऽथो विदुषां जगद्धितकृते (३)भव्याकृतिर्भाविनीम् ॥१
तद्वाचामृतमुत्तमो (४)जनिजुषां जिज्ञासमानो गतिम्
धर्मस्याऽयमतन्द्रितः श्रुतिपुटे पीत्वैव (५)सज्जोऽभवत् ॥
तां द्रष्टुं समितिं प्रसन्नवदनः कौतूहली वेगवान्
शैथिल्यं नहि याति विज्ञपुरुषो (६)वावश्यमानः सुखम् ॥२॥
वेदान्तागमतत्त्वबोधकुशलैः सत्तर्कविद्याचणैः
सांख्याभ्यासपरम्परापरिचिताशेषप्रधानप्रथैः ।
योगाचारसरोवरेऽतिनिपुणं हंसायमानैस्तथा ॥
काणादाभ्यसनप्रजातधिषणप्रागल्भ्यलाभोद्भटैः ॥३॥
ज्योतिर्ज्ञानधुरन्धरैरुपनिषद्विद्याविनोदप्रियैः
संगीतागमगीतकीर्तिपटलैः साहित्यशिक्षाधनैः ।
सानन्दं समितिर्व्यलोकि विदुषा सा तेन तस्मिँस्तटे
गत्वा रम्यसमीरवारिणि ततो विद्वज्जनैर्मण्डिता ॥ ४
तत्रत्यामवलोक्य धार्मिकवरः सर्वां व्यवस्थां कृती
सोत्कर्षां क्रमशो यथातथमयं मीमांसमानो हितम् ॥
प्रत्यासन्नमुपासदच्छ्रुतवतो वैराग्यभाजो (७)यतेः
श्रद्धाभक्तिसमन्वितः शुभमतेः कस्यापि साधोर्वृती ॥५॥

१—नानानेकोभयार्थयोरिति विश्वः । २—तटे—तटं तीरं प्रतीरं चेति हेमचन्द्रः ३-भव्या योग्याकृतिराकारोयस्याः सा, भव्यं शुक्रे च सत्ये च योग्ये भाविनि च त्रिषु-इति मेदिनी । ४-जनिजुषां जन्मभाजाम् । जर्नुजननजन्मानि जनिरुत्पत्तिरुद्भवः इति, अमरः५--सज्जः सन्नद्धः, सज्जौ सन्नद्धसंभृतौ, इतिहैमः । ६--वावश्यमानो भृशं वाञ्छन् । ७—यतेर्यतिनः यती ख्यातो यतिश्च स्यादिति द्विरूपकोशः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नत्वाऽसौ नतिनीतिसाधुकुशलो वर्णाग्रजानां वरः
शिष्टाचारपरम्पराऽ(१) वनरुचिस्तं हंससंज्ञं पुनः ॥
ब्रूहि त्वं भगवन दयामयकृतेमे शास्त्रतत्वं यमिन् ।
प्रोच्यत्थंप्रुतः कृतञ्जलीपुटःस्तस्थौ विनम्राननः ॥६॥
सोऽपि स्वागतपुर्वकं प्रणयवान् सत्कृत्य वाचंग यतम्
नानशास्त्रनिगूढतत्त्वमहिमोत्पन्नप्रभावद्युतिः ॥
सत्तर्कानुगुणैः प्रमाणनिकरै शङ्का(२)समाधिं परम्
कुर्वन्नस्य महोदयस्य मनसस्तुष्टिं क्षणं तस्थिवान् ॥७॥
अन्ते हन्त महात्मना स च यमी नालं यदा भाषणे
साकं तेन स तार्किकः कथमपि प्राज्ञाग्रगीतस्तुतिः ॥
स्तावंस्तावमपेतगर्वसुमना मेधाविनं शङ्करम्
निष्पक्षत्वमशेषविज्ञपुरतो यातो नितान्तं शुचिः ॥ ८ ॥
तत्रत्यो विदुषांगणः सहृदयः शुद्धस्वभावान्वितम्
वैदग्ध्यैकनिकेतनं प्रवदतां मध्ये प्रतिष्ठोदयम् ॥
निश्चित्याथ सविस्मयोऽस्य नवनं चक्रे भृशं सत्कृते
र्यायाद्यत्र विचक्षणः शुभगति र्मानस्तदीयस्ततः ॥ ९ ॥
सत्संगादिफलानुभूतिजनिताऽऽमोदातिरेकःपुनः
श्रुत्वायं कुहचित्सुयोग्यविदुषां श्रीनर्मदायास्तटे ॥
गोष्ठीं कामपि रामणीयकयुते लोकोपकारक्षमाम्
क्षिप्रं तत्र जगाम वा कृतिजनः सोत्कः सतां संगमे ॥१०॥
संप्राप्यातिमनोज्ञवाक्रचनः स्थानं स चेतोहरम्
तद्रम्यं विबुधै रनेक निगमाभ्यासक्षणै र्भाषणम् ॥
योगाचारविशुद्धमानसगतिः श्री दीक्षिताद्यैस्तथा
सन्न्यासाश्रमकैस्ततान बहुशः शास्त्रेषु सम्भाषणम् ॥११॥
योगीन्द्रव्रजपूजिताङ्घ्रियुगलं सच्छास्त्रविद्यागुरुम्
पेदे छात्रतया ततश्च परमानन्दाभिधं सद्विधम् ॥

१--श्रवनं पालनम् । २--समाधिं समर्थनम्, समाधिर्नियमे ध्याने निवाके च समर्थने इति विश्वः ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तादृक्षः पुरुषोपि चात्र विरलो यो युक्तरूपं सदा
कुर्वन्कार्यमुपैति सिद्धिमखिलां सत्सङ्गतौ सोद्यमः ॥१२॥
वेदान्ताभिनवप्रबन्धरचनोदन्तप्रबोधोदयः
स्वाविर्भूतविशेषतत्त्वकलनाहेवाकिताकस्ततः ॥
तस्माद्दर्शनशास्त्रतत्त्वममलप्राज्ञोऽतिशीघ्रं यमी
लेभे शान्तमना मनीषिसमितौ विख्यातकीर्तेः कृती ॥१३॥
संसारव्यवहारकारणवशात्सत्तत्त्वचिन्ताजुषाम्
प्रायेणात्रविवेकिनामपि बुधामत्याहितं जायते ।
इत्थं तस्य विचारणाऽजनि सतश्चित्ते कदाचिच्छुभा
तत्सम्बन्धपरम्पराक्षतिरतःकार्य्या कथं मेऽधुना ॥१४॥
संन्यासाश्रम संग्रहोपि परमो बुद्धोऽस्तियत्नो बुधा
स्वातन्त्र्यामृतपानलाभरुचिनाबन्धप्रहाणक्षमः ॥
धन्यास्ते पुरुषा महामतियुजो येषां सतां चेतसि
सूदर्काऽत्र विचारणा स्थितिमती संजायते ज्ञानिनाम् ॥१५॥
संन्यासाश्रमदीक्षणाय सुगुरो रन्वेषणायां रतः
कंचित्कालमसौ निनाय परितस्तीर्थानि वासन्दधत् ॥
पूर्णानन्दमथो विशुद्धचरितं योगीश्वरं योगविद्
गत्वाऽयाचत निर्भयां सविनयं दीक्षां स चान्ताश्रमीम् ॥१६॥
जिज्ञासु र्मनसोऽस्य भावनिकरं धीरः स योगीश्वरो
मार्गोऽयं कठिनोऽस्ति वत्स नितरां मास्मिन् निदद्ध्याः पदम् ॥
आयुष्मन्नुपभुङ्क्ष्व वैभवफलं गत्वा गृहे सादर-
मित्येवं तमुवाच सुन्दरगिरा विज्ञानपाथोनिधिः ॥१७॥
श्रुत्वा तत्कथनं कृताञ्जलिपटो नम्राननः शङ्करः
चिन्ताव्यालविलासखिन्नमतिगुस्तं स्वेष्टसिद्धेः कृते ॥
उद्युञ्जानमना मनस्विमवरं भूयोऽपितं सोऽवदद्
मौनं चाऽपि विषायते गुरुजनाभ्यर्णे यतोऽभ्यासिनः ॥१८॥
श्रीमांश्चापि विहाय निष्फलतया यानेव भोगान्स्वयम्
निर्वाणैकनिमित्तमागमगणाऽनुज्ञातमन्त्याश्रमम् ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वीचक्रे विदितोरुवेदसमयः कस्मादयं पीड्यते
स्वामिंस्तेसरलो ऽपितत्रविषयेकोयंविवेकक्रमः ॥१९॥
एवं सोऽपि निशम्य तस्य वचनं मेधाविनः साशयम्
तद्वैराग्यदृढत्वमार्य्यचरितो विज्ञाय सम्यक्तया ॥
जोपं किंचिदतिष्ठदाह निपुणं तं धैर्य्यशाली पुनः
संन्यासाश्रमसंश्रयस्य समयो नायं वटो ! विद्यते ॥२०॥
वैराग्ये क्षणिके विरक्तिपदवीं संप्राप्य ये मानवाः
तारुण्ये कलयन्ति मुग्धधिषणा अन्त्याश्रमित्वे पदम् ॥
पश्चात्ते मदनादिशत्रुनिहता भ्रष्टास्तथा हास्यतां
गच्छन्तो नरकालयं प्रति नरा अन्तेगतिं कुर्वते ॥२१॥
माकार्षीर्हठ मङ्ग ! वत्स ! गमनं कुर्याः स्वकेतंप्रति ।
मज्ञावज्जनयोग्य कार्यकरणेत्वं सावधानो भव ॥
कालोऽयं गृहमेधिनस्तव कथं भीतिस्ततो जायते
भीरुत्वं ह्यपहाय सौम्य ! धृतिमन्कुर्य्याहचिं स्वे विधौ ॥ २२ ॥
वैराग्यं यदि तावकं दृढतरं जातं जगत्कर्मणि
शास्त्राज्ञानुगुणं तथापि भवता भाव्यं गृहस्थेन हि ॥
तन्निर्वाहमतन्द्रितेन निपुणं कृत्वापुनः स्वेप्सितम्
कर्त्तव्यं करणीयमत्र भवता ह्येतन्मतंमामकम् ॥ २३ ॥
माभूत्कापि विधेः क्षतिः प्रियवर ! प्राज्ञास्तथा कुर्वते
संसारेऽत्र विशांवराः सुमतयः कृत्यानि नित्यं प्रति ॥
एवं चापि विधीयतां रुचिरस्ये सानन्दमेवाऽधुना
गार्हस्थ्ये भुवनोपकारकरणो १द्युक्तिक्षमे शान्तिधृत् ॥ २४ ॥
धर्मे यः पुरुषो विधातुमनघो वष्टि प्रकृष्टक्रिय
स्तत्रैवास्यमनोऽनुरूपविधयो जायन्त एव वृत्तिन् ।
नाश्रौषीः किमु वत्स तत्र भवतश्चित्रं चरित्रं वटो !
भूजाने जनकस्य रुद्धमनसो वेदान्तविद्यागुरोः ॥ २५ ॥

१—उद्युक्तिरुद्योगः—

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

किं कृष्णस्य महात्मनो न विदितं वृत्तान्तजातं त्वया
गीताग्रन्थविधायकस्य सुमते ! योगीश्वरस्यप्रभोः ।
संसारोपकृतौ समर्पितमना यो गार्हपत्याश्रमे
संन्यासाश्रमवासिनामपि गुरुर्जातः प्रतापी नृपः ॥ २६ ॥
क्लैब्यं मास्म गमो मुधा पटुमते ! त्वं धैर्यशाली भव
स्थानेऽदस्त्वयिनोपपन्नधिषणे जह्यास्तदाशुप्रिय ! ॥
स्वीकुर्या गृहमेधिता मपि पुरस्तात्त्वं महात्मँस्त्वया
कृत्वात्मानुगुणं सुतं प्रतिनिधिं संन्यासिना भूयताम् ॥ २७ ॥
प्रत्येकं मनुजो विभर्ति जगति त्रैधं महात्मन्नृणम्
निर्मुक्तो नहि यावदार्य्यचरितः संजायते पूरुषः ॥
तावन्नो लभते स जातु विरतिं संसारबन्धात्कचित्
इत्येवं समयोऽस्तिशास्त्रविदुषां तं पालयेः श्रद्धया ॥ २८ ॥
इत्थं तं परिबोधयन् यतिवरः सद्युक्तिमानव्रजै-
र्भूयो भूय उदारबोधसहितो व्याख्यानवाचस्पतिः ॥
विश्रान्तोऽजनि तार्किकः सच यदा लब्धावकाशस्तदा
सोऽप्यूचे विनयावनम्रवदनो मन्दस्मितंसानतिः ॥ २९ ॥
दृष्टं भो इतिवृत्तमार्यधिषणा नूनं मया वा श्रुतम्
किञ्चातो भवतो मनोरथगणः सम्पत्स्यते सम्प्रति ॥
एतावानहमस्मि कुण्ठितमतिः स्वामिन् नवा श्रीमतः
संजाने न यतः प्रतारणवचो यच्चाऽधुनोदीर्य्यते ॥ ३० ॥
जानानोपि भवान् स्वयं श्रुतिमतं शास्त्रस्मृतीनां तथा
सिद्धान्तं परमार्थतो हि भगवन् धर्माधिकारोऽधुना ॥
दृष्टान्तादिवलादकारणमहो कस्मान्मुमुक्षुं जनम्
श्रीमान् पीडयति प्रकामविकलं केयं सतां व्यापृतिः ॥ ३१ ॥
कामं केचन सज्जनाः क्षितितले ऽभूवन् विदेहादय-
स्तादृक्षा अपि योगिनोऽत्र गृहिणो विद्वन् पुरा भूभृतः ॥
अन्ये चापि महर्षयो द्विजवरा जानामि चैतत्स्वयम्
नो जानेऽस्मि परन्तु तत्र भवतात्यक्तः कथं साश्रमः ॥ ३२ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैराग्यं क्षणिकं न नौमि भगवन् यच्चायतौ दुःखदम्
किन्तु स्तौमि मुहुश्चिरन्तनसखं रक्षामि नित्यं च तत् ॥
यल्लब्ध्यै सकलोऽपि योगिपुरुषो मोक्षाय नित्यं प्रति
युक्तात्मा घटते परिश्रमयुतस्तद्वाञ्छनाय स्थितः ॥ ३३ ॥
स्वच्छन्दोपि च निःस्पृहो गुरुवर ! त्वं विद्यसे सर्वथा
वादं वा भवता समं कथमपि श्रीमन्न कर्त्तुं क्षमः ॥
इत्येवं विनयाऽऽनतः प्रकथयन् तस्याङ्घ्रियुग्मेऽपतत्
मन्त्रःकोऽपि विलक्षणोस्ति नमनं दुःसाध्यसिद्धिर्यतः ॥३४॥
उत्तिष्ठाङ्ग ! परीक्षितोसि विदितो भावस्त्वदीयो मया
सन्तुष्यामि दिनत्रयं विरचयेः सौम्योपवासं पुरा ॥
पश्चात्तुभ्य मवश्यमेव विधिना दातास्मि दीक्षां हिताम्
निश्चिन्तो भव याहि सोऽथ यतिराडित्थं तमूचे सुखम् ॥३५
वेदाभ्यासतपोविशुद्धमनसं सत्योक्तिहेवाकिनं–
वेदान्तागमवाटिकाविहरणव्यापारवन्मानसः ॥
सन्न्यासाश्रमिणं विधाय समये शास्त्रानुकूलं स तं–
काषायाम्बरदण्डधारणमनोज्ञाकारमादिष्टवान् ॥ ३६ ॥
योग्यं त्वामवगम्य साधुविधया साधो ! इदानीमदां
यां दीक्षां भवते विधेहि सफलां तामार्य्यभाव ! क्षितौ ॥
वारंवार मयेमनोहरवपुः क्व प्राप्यते संसृतौ
पौंस्नं वा पुरुषार्थिसार्थप्रवर ! ज्ञात्वेति धर्म्मं चर ॥३७॥

अद्यत्वे बहवोऽपि गेहकृतितो भीता हरेर्गौरिव
सन्न्यासित्वमवाप्य शास्त्रविमुखा अत्याहितं भारते ॥
कुर्वन्त्यत्र यथा विशालधिषण ! त्वं मा तथा भूर्भुवि
वाञ्छेयं मम विद्यते हृदि यतिन् ! नो तत्प्रतीपं व्रज ॥३८ ॥
अत्रत्याः पुरुषा निजाश्रमकृतिं नित्यं प्रति ध्यानिनो
यावद्वत्स ! वितन्वते स्म विधिवत्तावत्समेषां गुरुः ॥
देशोऽयं बहुमानभाजनभभून्निःशेषसम्पद्युतः
तद्राहित्यमवाप्य दुर्गतिगणं कं कं नवा सेवते ॥ ३९ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैराग्यैकधना अधीतनिगमा सद्भव्यकामाः पुनः
सत्याचारविचारपद्धतिपरा यावन्न संन्यासिनः ॥
जायन्तेऽत्र यशस्विनो धृतिभृतस्तावन्न पुण्यक्षिति-
र्यत्नै र्भूरिभिरङ्ग ! मस्करिमणे ! दैन्यं न हातुं क्षमा ॥४०॥
लोकव्यंसनहेतवेऽद्य बहवो धूर्ता जनः संसृतौ
विद्यागन्धमवाप्य वेशरचनां नानाविधां तन्वते ॥
तत्र त्वं मतिमन्न जातु रचये वासं यथासंभवं-
दुर्भावो हि विशूचिकामय इव व्यासङ्गजो ऽनिष्टकृत् ॥४१॥
कौपीनं यतिनः प्रशस्तकृतिनः कन्था च शीतार्तिहृत्
पादत्राणनिमित्तमत्र भवतो भव्ये तथा पादुके ॥
दण्डश्चेति महर्षिभिस्सुमतिभिश्चिह्नानिपूर्वैः पुरा
प्रोक्तानीति तदीयधारणमये कुर्य्या यतिन् ! सर्वदा ॥४२॥
सर्वेषामपिप्राणिनां विहननं चित्तेपि नो चिन्तयेत्
संन्यस्याचरणां न जातु यतिराड्हन्याद्विपद्वानपि ॥
वीर्य्यं वीरतया शुचिः प्रतिदिनं रक्षेद्दयासंयुतो-
ग्रामान्ते तरुमूलके च रचयेद्वासं सदाध्यानवान् ॥ ४३ ॥
तृष्णां भिक्षुजनोविहायसुमना भिक्षाशनोऽमत्सरः
प्राणायामविधानशुद्धमतिकः सन्त्यक्तसङ्गोऽसताम् ॥
मानेच्छारहितः समस्तजगतः कल्याणदाने प्रभुः
निर्भीको विचरन् महीं विजयते कक्षापटीछादनः ॥४४॥
दर्शं दर्शमनाकुलं पथि पदं गच्छन्न्यसेदग्रतो
वस्त्रच्छानितमापिबेदथ पयस्तन्द्रातमश्चन्द्रमाः ॥
दोषव्रातविवर्जितां गुणयुतां ब्रूयाद्गिरां वा ततिं
चित्तेनातनुयाद्व विचारममलं भिक्षुप्रकाण्डः सदा ॥४५॥
अध्यात्मानुरतिः समाहितमनाः संसारसम्पद्घृणः
क्षीनाशक्षयवेदनाऽनुभवतः सम्भूतभीत्युद्भवः ॥
क्रुध्यन्तं प्रति शान्तमानसतया वर्त्तेत सद्भाषण-
आक्रुष्टोऽपिच यो वदे त्प्रियवचो धन्यः स योगीश्वरः ॥४६॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उत्पातस्य निमित्तकस्य च फलं विज्ञाप्य कंचित्प्रति
प्राणैःकण्ठगतैरपीश्वरकृपाकामो नवा कर्हिचित् ॥
वाञ्छेद्भैक्षमनिन्द्यभावभरितः संन्यासिलोकः क्वचित्
इत्येवं प्रवदन्ति पण्डितवरा यैर्धर्म्मशास्त्रं स्मृतम् ॥४८
धैर्य्यंतातजनं क्षमां चजननीं शान्तिं प्रियां स्वप्रियाम्
सत्यं मित्रमथो दयां च भगिनीं बन्धुं मनोनिग्रहम् ॥
शय्यां भूमितलं दिशश्च वसनं बोधामृतं भोजनं
जानानो नहि खिद्यते क्षितितले योगीत्यवोचद्धरिः ॥४९॥
स्वयमेवास्ति भवानपि प्रथितधीरालोडिताम्नायकस्
त्वय्यप्यद्यविशेषशिक्षणविधिर्विज्ञे नचावश्यकः ॥
श्रीवेदानुगुणं गुणिन् प्रतिदिनं कार्य्यं वितन्द्रः कुरु
इत्युक्त्वा मितभाषणो नतिपरं संभाष्य मौनं गतः ॥५०॥

इति मुनिचरितामृते सप्तमोबिन्दुः ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ मुनिचरितामृतेऽष्टमो विन्दुः ।

अध्याप्य वेदान्तनिबन्धजातं शिष्यं स तं पाठनचातुरीकः ।
पुरातनस्थानविलोकनोत्कः श्रीद्वारकातीर्थमियायदण्डी ॥ १ ॥
तस्मिन् गते कंचन कालमेकः स्थित्वा समासादितसद्विवेकः ।
समाधिमानाधिविवर्जितोसा वद्वैतविद्याभ्यसनेरतोऽभूत् ॥ २ ॥
व्यासाश्रमस्थंकृतयोगसंस्थं, तपस्विनं कंचन काञ्चनाभम् ।
निशम्य वैराग्यसमाधिविचं तत्सङ्गतिं प्राप परापरज्ञः ॥ ३ ॥
योग्यस्ततो योग्यतमादधीत्य योगागमोदन्तनिबन्धवृन्दम् ।
अल्पेन कालेन हि विज्ञवर्य्यश्छिन्नाडसंज्ञं नगरं प्रपेदे ॥ ४ ॥
कृष्णाभिधाद्व्याकरणं पठित्वा नागेशनागोजिसमानमानात् ।
सम्भावितावार्य्यवरः कृतार्थश्चाणोदकन्याणिपुरंप्रतस्थे ॥ ५ ॥
राजद्युते राजगुरोः सकाशाद्व विनमूतारत्ननिधानभूतः ।
प्रचर्च्य वेदं विदितप्रभावात् प्रसन्नतां कामपि सोऽथ लेभे ॥ ६ ॥
अज्ञानकान्तारविलोपदावः समाहितान्तःकरणःसुभावः ।
यथेप्सितंलाभमवाप्यभिक्षुस्ततोऽपिचक्रेगमनंयुयुक्षुः ॥ ७ ॥
ज्वालाशिवानन्दपदाभिधेयौ सतां वरौ [१]छोरितसर्वहेयौ ।
शब्दार्थवत् सन्ततसङ्गभाजौ व्यलोकिषातां पथि योगिराजौ ॥ ८ ॥
दिष्ट्या तयोः सङ्गतयोः प्रभावात् समाधिसम्पत्तिविशेषमाप ।
यं मेधिरोऽयं विनयोपपन्नस्तद्वर्णनेऽलं न पुराणगो[२]ऽपि ॥ ९ ॥
आस्वर्गवासं च तयोः कृतज्ञः सत्योक्तिसंपन्निधिजागरूकः ।
सधन्यवादं स्मरणं वितन्वन् मध्येसभं योगगतिं शशंस ॥ १० ॥
तस्यैव विद्या सफला बुधस्य महात्मनो यो गुणिशिष्यमध्ये ।
निधाय तां याति दिवंविवेकी तद्भिन्नवृत्तेस्तुसुधाप्रयासः ॥ ११ ॥
संवत्सरानकाँश्चनकान्त[३]कान्ति र्योगिव्रजान्वेषणलब्ध[४]शान्तिः ।
व्यालाकुलाऽऽरण्यमही महीनो बभ्रामकिंधैर्य्यधनो यती नो ॥ १२ ॥

१—छोरणं स्यात्परित्यागः इति पुरुषोत्तमः । २—पुराणगो ब्रह्मा, पुराणगो हंसगविश्वरेतसौ, इत्यादि हैमः ३—कान्तिः शोभाभिलाषयो रितिविश्वः । ४—शान्तिः शमेऽपिकल्याणे, इत्यपि विश्वः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्रापि योगीन्द्रमयं महेच्छः शुश्रावकंचिन्महनीयभावः ।
तस्यैव सामीप्यमगादगर्वः सोढ्वाऽपिकष्टं विविधंवनान्ते ॥ १३ ॥
यदुत्तरस्यांदिशिविद्यमानं हिमालयोपान्तविशुद्ध भूमौ ।
तीर्थं हरिद्वारपदाभिलाप्यं साधुद्विजाऽऽवासविशेषरम्यम् ॥१४॥
कुम्भोत्सवं भूरि[१]सवं सहर्षं सुसंविधानं सच तत्र शान्तः ।
आलोकितुं लोचनलोभनीयं पेदे सुचारूरुगतिः पदातिः ॥ १५ ॥
कर्णान्तविश्रान्तविशालनेत्रं भ्राजिष्णुभालं धृतगन्धमालम् ।
मत्स्याकृतिभ्रूयुगलं दधानं मनोज्ञनासं सुकपोलभासम् ॥ १६ ॥
प्रवाललक्ष्मीहरदन्तवस्त्रं तपःशस्त्रच्छिन्नमनोजशस्त्रम् ।
सुकन्धरं चारुकफोणिपाणिं क्षामोदरं बन्धुरगुल्फजङ्घम् ॥ १७ ॥
कौपीनमेणाजिनमावसानं दुर्वासनाऽऽरातिकृतावसानम् ।
अधीरभावं ह्यपि(२)धीरमुख्यं सम्पादिताम्नायविशेषसंख्यम् ॥ १८ ॥
महाभुजं भूसुरवंशरत्नंविमुक्तिसम्प्राप्तिपर-प्रयत्नम् ।
लोकत्रयाक्रान्तयशोविभूतिं धर्म्मादिसन्तानकुलप्रसूतिम् ॥ १९ ॥
तत्रस्थितो यात्रिजनोऽतिसंख्यः सतृष्णमालोक्य (३)समञ्जसाख्यम् ।
आपाङ्गविस्फारितलोचनाभ्यामेनं जनुःस्वं सफलं [४]नु मेने ॥ २० ॥
यत्रस्थितिं सोऽथचकारदण्डी मायाविगायाऽधिविलासखण्डी ।
तत्रैव सभ्याः पुरुषाः समन्तात्समागमन्नस्ययतेः पुरस्तात् ॥ २१ ॥
प्रणम्य साष्टाङ्गमनिन्द्यभक्तिः कश्चिज्जनः साधुनतिप्रसक्तिः ।
पप्रच्छनामादिकमाप्तविद्यं यतीश्वरं सोऽपि जगादहृद्यम् ॥ २२ ॥
श्रद्धान्वितं तं विहितप्रणामं सन्न्यासिलोकानुगुणोत्तरेण ।
सन्तोषयामास मनोहरोक्तिर्वाग्मीश्वरो ज्ञाततदीयभक्तिः ॥ २३ ॥
सुकोमलाऽऽलापलसन्मुखश्रीः श्रीमानुदस्थादथदर्शनाय ।

१—भूरयः सवा यागा यत्रतम्—सवो यज्ञे च सन्ताने, इति मेदिनी । २—धीरः पण्डितमन्दयोरिति पुरुषोत्तमः ॥ ३—समञ्जसा समीचीना, आख्या यस्य—तम्,—समीचीनंसमञ्जसामिति ४—नुप्रश्नेऽनुरुये ऽतीतार्थेविकल्पवितर्कयोरिति हेमचन्द्रः ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

महात्मनां योगविदां बुधानां यात्रामिषात्तत्र समागतानाम् ॥ २४॥
यत्रस्थिता भूमिसुराःसुरेशंविशुद्धवेशा मनसा भजन्तः ।
लोकोत्तरं कीर्त्तिपदं व्रजन्ति देहावसानेऽप्ययनं लभन्ते ॥ २५ ॥
विहाय सांसारिकभव्यभोगान् विपाकसम्भावितभूरिरोगान् ।
यत्पुण्यतोयाऽमृतपानधन्याः कृतार्थतां यान्ति परां वदान्याः ॥ २६ ॥
अनेकजन्मार्जितपापपङ्कलेपाचितान्तः करणोऽपि जन्तुः ।
यस्याः पयःपीतिमहत्त्वयोगात्प्रजायतां साधुमतिर्विमन्तुः[1] ॥ २७ ॥
विचित्रधारांसरिदेकसारामनेकरोगौघविनाशिवाराम् । (प्रत्या दुर्लभः)
आवर्त्तसंवर्त्तनरम्यरूपां तरङ्गरंहोतिमनोज्ञरूपाम् ॥ २८ ॥
हिमालयोत्तुङ्गयशःपताकां भगीरथश्लोक[2]सुधाङ्गराकाम्
पुण्यक्षिते गौरववेदियूपां विरूपचर्य्यान्धपदप्रकूपाम् ॥२९॥
समुच्छलच्छीकरधौतकूलां धधत्प्रवाहामतिमोदमूलाम् । (न्यायुत्वे दुर्लभः)
द्विजावलीशोभितभव्यतीरां पुष्पाञ्जलिव्रातसुगन्धिनीराम् ॥३०॥
श्रद्धालुविद्वज्जनगीतनावां नावागणक्रीडितरम्यभावाम् ।
मज्जज्जनक्षोभचलत्तरङ्गां व्यलोकयत्तां पुरतः स गङ्गाम् ॥३१॥
तस्यास्तटे क्वापि सकूर्चगल्लान् धम्मिलभारान् वपुषातिमल्लान्
रक्तांशुकाऽऽच्छन्नकटिप्रदेशान् संन्यासिवेशा[3]न्पुरुसंनिवेशान् ॥३२॥
कुम्भोदरान् यष्टिधरानभिज्ञानज्ञानभाग्व्यंसनसिद्धकल्पान्
ततः परं मायिकतास्वरूपान् विलोकयामास स मूढभूपान् ॥३३॥
पौरुष्यसम्पादनबद्धकक्षान् भङ्गादिपानाभ्यसनातिदक्षान्
भस्माचितान्धारितलम्बबालान् प्रतारितानेककुलीनबालान् ॥३४॥
बम्बंरवापूरितदिग्विभागान्शरीरपुष्टिं प्रतिभूरिरागान् ।
निरक्षरानक्षरगर्वशालान् भ्रूभङ्ग सन्दूषितभालजालान् ॥३५॥

१—विमन्तुः, अपराधरहितः (सन्) मन्तुः पुंस्यपराधेऽपि मनुष्येऽपिप्रजापतौ, इति मेदिनी ॥

२—सुधाङ्गश्चन्द्रः—लुङ्गीशरात्रिमणिवर्क्षाविपत्सुधाङ्गाः, इत्यमरदिहारावली ।

३—पुरु—प्राज्यं प्रभूतं प्रचुरं बहुलं बहुपुष्कलं । भूयिष्ठं पुरुहंभूयो भूर्य्यदभ्रं पुरुस्फिरम् ॥ इतिहैमचन्द्रः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिगम्बरानम्बरनोदिताम्बान् विनिर्दयन्त्यक्तसबान्धबाम्बान् ।
श्रद्धालुभिः कारितसाधुपूजान् समालुलोकेऽग्रत एष वाऽज्ञान् ॥३६॥
स्नानानुलिप्तान् कृतचिक्कणाङ्गान् सुपेशलालंकृतिवर्द्धिताऽभान् ।
नानाविधैर्वञ्चनवाग्विलासैः स्वार्थोपपत्तौ विहितावधानान् ॥३७॥
सङ्कल्पमात्रावगतिप्रगल्भानघ्रातसच्छास्त्रविचार[१]गन्धान्
षट्कर्मवंशाब्जहिमालिकल्पान् गङ्गासुतान्कांश्चिदथोददर्श ॥३८॥
नानाविचारावलिसंकुलात्मा विलोकिताऽधर्म्मगतिर्महात्मा ।
पवित्रतीर्थेपि ससत्य(२)सन्धो न सन्दधे किंनु विशेषकृत्यम् ॥३९॥
सद्भावसंन्यासिजनोपकण्ठं शङ्कासमाधानविनोदलाभः
तत्रातिसम्मर्दतयाजनानांचण्डीगिरौवासमसौचकार ॥४०॥
तत्राधिवासंकतिचिद्दिनानिप्रलब्धवैराग्यविशेषतोषः ।
सत्सङ्गतिप्राप्तमनःप्रसत्तिः कृत्वाहृषीकेशमियायदण्डी ॥४१॥
तत्रत्यविद्वज्जनसङ्ग(३)जातं सन्तोषजातंमनसाऽनुभूय ।
पश्यन् वनव्रातमनोज्ञशोभांमार्गे टिहीरीं नगरीं प्रतस्थे ॥४२
तद्वासिदोषज्ञकृतातिमानस्तिरस्कृताशेषमनोऽभिमानः ।
तद्राजधानीनिकटे कुतश्चिद्दिव्ये मठे सोऽथ ममाठ सूरः ॥४३॥
रत्नायमानःपुरि तस्य मित्रं सम्पत्तिशाली सुमहाचरित्रः ।
कश्चित्कदाचित्कमनीयवंशो महोत्सवं कर्त्तुमना द्विजेन्द्रः ॥४४॥
अभ्यस्तनानाविधतन्त्रमन्त्रःपुराण(४)लीलाललितप्रयत्नः
[५]विशेषनिर्बन्धपुरःसरन्तंनिमन्त्रयामासविनीतभावः ॥४५॥
सौहार्दसम्बन्धनिमित्ततन्त्रःपरेद्यु रागादशितुं तदीये ।
गेहे वशी भूतिनिधानभूते मध्याह्नकाले वटुनाऽपरेण ॥४५॥
द्वारोपकण्ठे शकलानि कुर्वन् मांसं लवित्रेण शितेन तेन ।
व्यलोकि कश्चित्पुरुषोऽतितुष्टः कौटिल्यसन्दोहविधानजुष्टः ॥ ४७ ॥

१—गन्धःप्रतिवेश्यामोदलेशसम्बन्धगन्धके, इतिमेदिनी
२सत्या सन्धायस्यसः, सन्धाप्रतिज्ञा मर्य्यादेत्यमरः ।
३—जातंव्यक्तयोर्वजन्मसु,इतिमेदिनी ४-लीलांविदुः केलिविलासखेलाशृङ्गारभव-प्रभवक्रियासु इतिविश्वः ५—विशेषनिर्बन्धपुरःसरं—विशिष्टाग्रहपूर्वकम्

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्नातोपलिप्तंधृत भव्यमालं प्रसादितोत्तुङ्ग[१]घनोरु(२)बालम् ।
घृतादिसम्भावितमेपमांसं स राधयन्तं कमपीक्षते स्म ॥ ४८ ॥
हा विप्रवंशेऽद्यकुतोऽवतारः काले कलौ हिंसकतापिशाच्याः ।
तपस्विमेषादिविनाशहेतुः प्रजायते यद् द्विजमानवोऽपि ॥ ४९ ॥
ऐदंयुगीनास्तु नराः प्रजाताः पापाभिलाषाः किमु भारतेपि ।
सौहित्यसम्पादनमात्रहेतोः व्यापादयन्तेहि वराकसत्वान्॥ ५० ॥
काले पुरा यत्र समस्तवर्णा अहिंसकत्वव्रतलब्धवर्णाः ।
बभूवुराम्नायविचारदक्षा स्तत्राद्य विप्रा अपि मांसभक्षाः ॥ ५१ ॥
यस्य व्रतस्यैवमहत्त्वयोगादासीत्पुराभारतदेश एषः ।
संसारमात्रस्य गुरु र्गरीयान् [३]तदेव हा संप्रति हन्यते किम् ॥ ५२ ॥
एवं विचारं सुविचारशीलः कुर्वंस्ततस्तत्क्षणमेवसोऽगात् ।
नतादृशोधर्म्मविरुद्धकृत्यं श्रोतुं समर्थः किमुदर्शनेऽलम् ॥ ५३ ॥
महोदयो भूरिदयस्य तस्य विनिर्गमं विज्ञतमस्य बुद्ध्वा ।
भूयोऽपि नेतुं रचिताभिलाषो गेहं तमागत्य बभाण सोऽपि ॥ ५४ ॥
मांसादिकं सर्वपदार्थजातं भवन्निमित्तं भगवन् मयाद्य ।
सम्पादितं तृप्तिकरं कुतस्तद् विहाय तेऽकारि ततः प्रयाणम् ॥ ५५ ॥
मा मा महात्मन् गृहमेधिनो मे श्रद्धातिरेकं विफलीकुरुष्व ।
भवादृशः साधुजनोऽपि कश्चित्प्रतीपमायातिविनीतदासे ॥ ५६ ॥
मांसाशनं मे नहि रोचतेऽङ्ग दृष्ट्वापि तद्ग्लानिमुपैतिचेतः ।
स्थाने न सर्गोऽयमयेत्वदीयोयन्मांमुहुर्वक्षिमनोविरुद्धम् ॥ ५७ ॥
यद्दर्शनादेव वमिप्रभावः सम्भाव्यते मुग्धमते कथं तत् ।
भुक्तं प्रकल्पेतहितायवस्तु विचार्य्यतां तेऽपिमनाक् स्वबुद्ध्या ॥ ५८ ॥
यद्यस्ति मां भोजयितुं प्रवृद्धा वाञ्छाऽद्यते विप्र फलादिकं त्वम् ।
उपानयेः शीघ्रमिहैवसम्यक्करिष्यतेपाकविधिप्रबन्धः ॥ ५९ ॥
इत्युत्तरं प्राप्य ततस्तदानीं खिन्नो भवन् स्वं भवनं जगाम ।
मनोऽभिलाषेऽपगते कथंस्यान् मनस्विनो मोदविशेषलाभः ॥ ६० ॥

१—घनाः कठिनसंघातमेघकाठिन्यमुद्गरा इति वैजयन्ती ।
२—बालाः केशाः—बालोऽज्ञेऽश्वेभपुच्छयोः । शिशौ ह्रीवरकचयोरिति हैमचन्द्रः । ३—तदेव, अहिंसकत्वव्रतमेव ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मांसादिकव्यापृतिहेतुकानि तन्त्राणि लब्ध्वा कतिचित्कुतश्चित् ।
वेदप्रतीपंच मतं तदीयं विज्ञातवान् ज्ञानिसमाजमुख्यः ॥ ६१ ॥
प्रतिदिनं विपदावलिभाजनं भवति भारतभूमिरियंयतः ।
तदपितान्त्रिकलोकमते कथं ह्यभिमतं सकलेष्टकरं परम् ॥ ६२ ॥
परकलत्रविलोकनपातकं वदति वेदविदां विदुषां गणः ।
अहह तान्त्रिकधूर्तमतेऽधुनाहितकरः परदारसमागमः ॥ ६३ ॥

विमलनिगमपदीक्षादक्षिणः सच्चरित्रः
प्रथितमतिविकासःकाशसंकाशकीर्त्तिः ।
निखिलयति गुणौघस्पष्टधामातिधाम
समगत स च योगी श्रीपुरं श्रीनिवासः ॥ सत्कर्मकत्वे दुर्लभमात्मने पदम् ।
रहसि कमपि रम्यं स्थानमासाद्य तत्र
प्रबलतरविवेकत्यक्तभोगाभिलाषः ।
विहित शिवसपर्य्यःकन्तुकेदारवट्टे
श्रुतिमतविपरीतांस्तान्त्रिकान् वा परास्थत् ॥

इति मुनिचरितामृते ऽष्टमो बिन्दुः ॥



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ मुनिचरितामृते नवमो विन्दुः ॥

एकान्तवासप्रियः सत्य(१)कामः कामादिकारातिसंछिन्नकामः ।
योगा(२)गमाकूतबोधैधितज्ञः सम्पूर्णवेदान्तसिद्धान्तविज्ञः ॥ १ ॥
आध्यात्मिकस्वच्छसंकल्पधारी दुर्वासनादाव(३)विच्छेदकारी ।
तापत्रयाऽऽयासितप्राणिवर्गप्रख्यातजीवातु(४)भैषज्यकल्पम् ॥ २ ॥
तेजस्विरूपं(५)गताम्नायसारं वीतस्पृहं तं विवेकाऽवतारम् ।
गङ्गागिरिर्नाम सन्न्यासशाली सम्प्रापकश्चिद्गिरिस्थो गुणाली ॥ ३ ॥
सत्कारपूर्वं दयानन्दनामा तत्स्वागतं सोऽतनोत्साधुधामा ।
संसारसम्बन्धहीनोऽपि शिष्टः सम्मानयत्येव मान्यं विशिष्टः(६) ॥४॥
वैराग्ययुक्तोऽपि सौजन्यजन्यप्रेमाऽमृताऽऽस्वादसन्तुष्टचित्तः ।
नित्यं यथाकालमागत्य साकं चक्रेऽमुना शास्त्रचर्चां ७सुवृत्तः ॥ ५ ॥
एवं तयोः सत्यसंकल्पभाजोः स्नेहामृता(८)ऽऽलापलाभातिरेकः ।
मासद्वयं यावदासीदजस्रं(९)यद्वर्णनेऽलं न जिह्वासहस्रम् ॥ ६ ॥
रुद्रप्रयागादिकं द्रष्टुकामः कौटिल्यराहित्यचेतोऽभिरामः ।
पश्चात्ततः सुप्रभातः कदाचित् कैश्चिज्जनैः प्रस्थितं स व्यधत्त ॥ ७ ॥

१—कामः स्मरेच्छयोरिति मेदिनी ।

२—आगमस्त्वागतौ शास्त्रे, इति हेमचन्द्रः ।

३—वने च वनवन्हौ च दवो दाव इहेष्यते, इति यादवः ।

४—जीवातुर्जीवनौषधमित्यमरः ।

५—रूपं स्वभावे सौन्दर्य्ये नामके पशुशब्दयोः । ग्रन्थावृत्तौ नाटकादावाकार-श्लोकयोरपीतिविश्वः ।

६—विशिष्टो विलक्षणे विशेषयुक्ते चेति शब्दस्तोममहानिधिः

७—सुवृत्तः शोभनचरित्रः, वृत्तोऽधीतेप्यतीतेऽतिवर्त्तुलेपिवृते मृते । द्वेऽन्य-लिङ्गं वा क्लीबं छन्दश्चारित्रवृत्तिषु, इति मेदिनी ।

८—अमृतम् पीयूषम्, पीयूषममृतं सुधेत्यमरः ।

९—अजस्रम्—शश्वदभीक्ष्णे नित्यं सदा सततमजस्रमिति कोशान्तरम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Siddhanta eGangotri Gyaan Kosha

निर्गत्य तस्मान्निशान्तान्निशान्तः प्राभातदृश्यावधानः पुरस्तात् ।
रक्ताम्बरां भिक्षुकीव्यक्तरूपामालोकयामास पूर्वामथाऽऽ(११)शाम् ॥८॥
(१२)कालस्यरूपान्धकेनात्मशत्रोरुद्भूतिसम्भावनां संविभाव्य ।
पाश्चात्यसिन्धूपकण्ठं सवेगं गत्वा नवान्तर्दधे किं तदानीम् ॥ ९ ॥
तेजस्विनामागतात्पूर्वमेव प्रत्यर्थिसन्दोहनिर्याणयोगः ।
इत्येवमज्ञायि किंनोबुधेन युक्तात्मनामग्रगेनाऽनघेन ॥ १० ॥
विद्रावयन्(१३)ध्वान्तवृन्दंसमन्तादुल्लासयन्दिग्विभागान्समस्तान् ।
व्याकोशयन्पद्मिनीनां कुलानि सम्पादयन्(१४)षट्पदव्रातलौल्यम् ॥११
संयोजयन् कोक(१५)युग्मानिकामं सन्देहयन्नात्मवृत्तौनिशाटान् ।
सन्तोषयन्सत्यसंकल्पभाजः स्फारप्रभोभानुराविर्बभूव ॥ १२ ॥
प्रादुर्भवन्नग्रतस्तस्य साधोर्नानाविधानेकपुष्पोपहारः ।
पुँस्कोकिलोद्भाविताऽऽलो(१)कशब्दस्तद्भावनां वा तनान(२)र्त्तुराजः ॥१३
मञ्जुध्वनिप्राणिताऽशेषविज्ञचेतोमृगव्रातरोलम्ब(३)मालाः ।
(४)माकन्दमाघ्रायमाघ्रायमञ्छमा[५]मोदमामोदभाजोबभूवुः ॥१४॥
व्याकोशमोचातरुस्कन्धलीना की[६]राङ्गना कान्तपार्थक्यहीना ।
रूपानुरूपाधिवासाधिवासा साफल्यवज्जीवितं मन्यते स्म ॥ १५ ॥

१०—निशान्तं सदने शान्त इति हेमचन्द्रः ।

११—आशादिग्=आशा तृष्णादिशोः प्रोक्ता, इतिविश्वः ।

१२—कालो मृतौ महाकाले समये यमकृष्णयोरितिमेदिनी ।

१३—अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तम इत्यमरः ।

१४—षट्पदा भ्रमराः=भ्रमरो मधुकृद् भृङ्गश्चञ्चरीकः शिलीमुखः इन्दिन्दिरोऽली रोलम्बो द्विरेफोऽस्व षडङ्घ्रय इति हेमचन्द्रः ।

१५—कोकाश्चक्रवाकाः, कोकश्चक्रश्चक्रवाको रथाङ्गाह्वयना क इत्यमरः ।

१—आलोको जयशब्दः स्यादितिविश्वः ।२—ऋतुराजो वसन्तः ।

३—रोलम्बा भ्रमराः । ४—माकन्दम् [आम्रसम्बन्धिनम्] तस्येदमित्यण्, आम्रे रसालोमाकन्दः कामाङ्गः पिकबान्धवः इतिहेमचन्द्रः ।

५—आमोदो गन्धहर्षयोरिति, हेमचन्द्रः ।

६—कीराङ्गना शुकयोषित्, कीरः शुके पुंभूम्नि नीवृति, इति मेदिनी ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[७]दात्यूहमाला मदावस्थचेताःसम्भूय सम्भूय मार्गे पुरस्तात् ।
स्वैरं कुतश्चित्सुरापानुरूपा वव्राज निःशङ्क मामोदमाना ॥ १६ ॥
नानारसास्वादनायासशीला फुल्लप्रसूनव्रजासक्तिलीला ।
गुञ्जद्विरेफावली कापि धीरं कर्त्तुं वसन्तोद्धवं[८] सज्जितेव ॥ १७ ॥
अङ्गारिताङ्गारधानीप्रभासः फुल्लाः पलाशाः समन्तादनेके ।
अवाजिषुर्विप्रयोगिस्मरार्त्तिप्रोद्दामहेतुत्वमाहो कुतश्चित् ॥ १८ ॥
उद्यानमुद्यानमागत्य केचित्सौहार्दभाजो मनुष्याः सदाराः ।
गौरीस्तवं कर्त्तुकामाः सकामाः पुष्पोच्चयं चक्रुरानन्दवन्तः ॥ १९ ॥
सौभाग्यवत्वोऽबला भूषिताङ्गः सद्भूषणैर्यामिनीकान्तकान्ताः ।
श्रोत्रे सदामोदसम्पर्कभाञ्जि चक्रुर्मनोज्ञानि पुष्पाणियानि ॥ २० ॥
निर्माय निर्माय काचिन्मनोज्ञाः पुष्पस्रजः प्राणनाथस्य कण्ठे ।
पृष्ठस्थिता धापयित्वा सरागं मन्दस्मिता गुल्मकान्तर्निलिल्ये ॥ २१ ॥
[९]नेपथ्यवेशाजनास्तत्र काले नो केवला लक्षिताः सम्बभूवुः ।
नूत्नाच्छदाच्छन्नशाखिव्रजोऽपिप्रायाद्विशेषामिवाऽऽसां समन्तात् ॥ २२ ॥
वासन्तदृश्यं विलोकं विलोकं सञ्जातकौतूहलो देवसृष्टौ ।
सिद्धाश्रमादौ कृतोरुप्रतिष्ठंमुक्तिप्रदख्यातिजुष्टंसुरम्यम् ॥ २३ ॥
स्थानंसमागादथो सत्य[१]कल्पो योगीश्वरप्राप्तिहेतोः पदातिः ।
उत्कृष्टवस्तूपलब्धिः कुतः स्यात्कष्टं विनातोऽत्रयत्नोविधेयः ॥२४॥
विज्ञाय तत्रत्यनिःशेषवृत्तं विज्ञानिसन्दोहमान्योयतीशः ।
रुद्रप्रयागं २प्रयागं प्रयागं यातो ३विशालं विशालं विशालम् ॥२५॥

७—दात्यूहः कलकण्ठक इत्यमरः ।

८—उद्धवम्—उत्सवम्—उद्धवो यादवभिदि महेच (उत्सवे) क्रतुपावके, इतिमेदिनी ।

९—नेपथ्यं रङ्गभूमौ स्यान्नेपथ्यं च प्रसादने, इतिविश्वः ।

१—कल्पः शास्त्रे विधौ न्याये संवर्त्तब्रह्मणोदिने इतिमेदिनी ।

२—प्रकृष्टा यागा यत्र ।

३—विभिःपक्षिभिःशालते शोभते; इतिविशालम्—विशिष्टाःशाला यत्र तद्विशालम् । आलयो निलयः शालासभोदवसितं कुलमिति हेमचन्द्रः । विशालं पृथुलम् ।

CC-0. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्कालधीः प्राप्तरूपै र्महद्भिर्योगादिसच्छास्त्रचर्चां वितन्वन् ।
तत्रैवकंचित् स कालं महात्मा निन्ये मुदा साधुभावस्वभावः ॥२६॥
आलोकितानेकधामान्तरालेयोगीश्वरान्वेषणादत्तचित्तः ।
प्रायादगस्त्याश्रमं भिक्षुकेन्द्रः कैवल्यसम्प्राप्तिकामोऽप्यकामः ॥२७॥
तत्रत्यवैज्ञानिकानां जनानां सामीप्यमासाद्य संन्यासिवर्य्यः ।
आमोदवन्मानसोऽभूत्तरां स सद्भाभवान् मोदते वा ऽत्र को ना ॥२८॥
एकान्तभूमौ क्वचित्तत्र लब्ध्वा चेतोऽनुकूलं कुटीरं तपस्वी ।
मासाँश्चतुःसंख्यकान्सातिहर्षं संयापयामास युक्तान्तरक्षः ॥२९॥
स्थानंमनोहारिदृश्यालिपूर्णंत्यक्त्वा यतीन्द्रोऽथवैराग्य[१]संस्थः ।
आसाद्यकेदारघाटाख्यभूमिंकालंमनाग्यापयामास माभः ॥३०॥ माया लक्ष्मी भा
गुप्तेन्द्रियो गुप्तकाश्यादिवासं कृत्वापि नूनं यथाकालमेयः । रव भा अस्य ।
केदारघाटं नु मुख्यं तदानीं चक्रेऽलमावासतः स्वस्यविज्ञः ॥३१॥
यत्रस्वभावानुकूलप्रबन्धश्चेतोनुरूपश्च सत्सङ्गलाभः ।
तत्राधिवासं मनोषी मनुष्यः कर्तुं कथं नो यतेतातिमात्रम् ॥३२
युक्तात्मनां दर्शनोत्कान्तरात्मा प्रालेयभूयिष्ठशैलालिमन्यैः ।
कैश्चित्ततः साधुभिः साकमागान्नैराश्यभाग्यन्तजात्रः परन्तु ॥३३॥
उद्योगशीलः परं धीरचेताः किंनिश्चितं जातुहातुं समर्थः ।
विघ्नव्रजाघातसंघाततोऽपि क्व स्यात् प्रतिज्ञातहानिः सतां वा ॥३४॥
अत्युन्नते तुङ्गनाथाद्रिकूटे पूजाकृतां मानवानां गणेन ।
जुष्टं तथाग्रावमूर्त्तिप्रवृद्धं यातोयतिर्मन्दिरं (२)मन्दराभम् ॥३५॥
तत्रत्यवृत्तान्तजातं समस्तं ज्ञात्वा प्रतिज्ञातसत्सङ्गवाप्तिः ।
चक्रे ततस्तत्क्षणं क्षीणतन्द्रः प्रस्थानमुद्योगशीलप्रवीरः ॥३६॥
किंचिच्चलन्नग्रतो दावमध्ये [३]वाटद्वयं निर्जने पश्यतिस्म ।
आहो ततो दुर्गमं दैवयोगादाश्रित्यगन्तुं प्रवृत्तोबभूव ॥३७॥

–१संस्था व्यवस्था प्रणिधिसमाप्त्याकारमृत्युषु, इतिवैजयन्ती ।
२–मन्दराऽऽभम्–स्वर्लोकवत्सुन्दरम् ।
३–वाटःपथश्चमा थश्चेतिपुरुषोत्तमः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सान्द्रद्रुमालीनिरुद्धप्रवेशं शुष्काम्बु(१)जम्बालिनीकं शिलाढ्यम्
दावप्रदेशं ततश्चाग्रतोऽसौ कंचित्ततः कण्टकाविद्धपादः ॥३८॥
उन्मील्य यत्रापि नेत्रे लुलोके तत्रैवदुःखप्रदं दृश्यमारात् ।
दृग्गोचरी तस्य साधो र्बभूव कल्याणलाभो हि वा दुःखपूर्वः॥३९॥
दृष्ट्वेव तां शोचनीयां तदीया मास्थां तदाभानु देवोऽपि रागी ।
मन्दप्रकाशो भवन्नस्तभावं यातो वदेत्को ऽत्रदेवप्रभावम् ॥ ४०
अन्धन्तमोनीलवासा पिशाची रात्रिस्तदोज्जृम्भितोद्दामसत्वा ॥
तद्धैर्य्यमग्नं निराकर्तुकामा दुर्वृत्तचेतोभिरामोद्धभूव ॥ ४१
नक्तं कथं तोयवह्नी विना मे वासोभवेन्निर्जनारण्यकेऽस्मिन् ।
एवं विचारावलीयुक्तचेताः शीघ्रं ततः स्थानतः प्रस्थितोऽभूत् ॥ ४२
उद्धातिनीं भूमिमुल्लङ्घयन्हातस्मिन्यनेकण्टकाऽऽपूरितागे ।
आभुग्नशाखागणाशक्तिमत्वाच्छिन्नांशुकोरक्तधाराङ्कोऽभूत् ॥ ४३
एतांदशांतस्यशोच्यां विलोक्य कालेतदा द्यौस्तुषारच्छलेन ।
पीयूषविन्दूनसिञ्चन्नु भिक्षोर्भव्ये जने कस्य नो पक्षपाताः ॥ ४४
नानाविधां दुःखमालां मनस्वीसम्भावयन्नो जहौ यद्धृतिं सः ।
तच्छीघ्रमेवोपघातः प्रसिद्धः कश्चित्पथ स्तस्यदृग्गोचरत्वम् ॥ ४५
आवास चिह्नानिदृष्ट्वापुरस्तात्कुत्रापि तिष्ठासुराश्रान्तएषः ।
साशंययौतत्रदैवात्परन्तुनो पूरिताहन्तसाशा तदानीम् ॥ ४६
(२)नीवासयोग्येतरांतत्रपल्लिं निश्चित्यनारोचयद्यत् सवस्तुम् ।
क्लान्तोऽपि तत्तादृशो युक्तमेव कार्यं बुधो बुद्धसद्धर्मरीतेः ॥ ४७
जोषीमठं प्राप्य रात्रिं निभाय प्रातः पुन र्गुप्तकाशींगतःसः ।
अद्योगिनस्तुक्षणश्चापि यत्र यायान्मुधा वस्तुमर्हो न तत्र ॥ ४८
सम्पाद्य सम्पादनीयं यतीन्द्रः सम्यक्तया तत्रविद्वत्सकाशात् ।
ओखीमठं द्रष्टुकामः प्रयाणं सत्याभिलाषोऽकरोद्युक्तयोगः ॥ ४८ ॥
पाखण्डिनस्तीर्थभूमीषुवासं प्रायोऽद्य कुर्वन्ति शास्त्रेषु मूढाः ।
एवं विचारं विचारं शुशोच प्रज्ञावतामग्रगो दूरदर्शी ॥ ४९ ॥

१—समुद्रगानिर्झरिणीतलोदाजम्बालिनीशैवलिनीतरङ्गिणीतिहारावली ।
२—उपसर्गस्यघञ्समासेबहुलमितिमेर्दीर्घत्वम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

चैत्याधिपस्तस्य रूपानुरूपं प्रागल्भ्यमालोक्य मुग्धस्वभावः ।
माना वृथा सौम्य कुत्रापि कुर्यास्त्वं वासमत्रैव सानन्दमङ्ग ॥ ५० ॥
किंहेतुको देहसंशोषणोऽयं दुर्गागयात्राभिलाषस्त्वदीयः ।
कालोस्त्ययं सौख्यसंदोहभुक्तेर्यस्ते मुधा याप्यतेऽरण्यभूमौ ॥ ५१ ॥
सर्वापि मे सम्पदा वत्स भव्या त्वत्स्वामितामेष्यति क्षिप्रमेषा ।
इत्थं सनिर्बन्धमाभाषमाणस्तं शिष्यतां नेतुमाशां बबन्ध ॥ ५२ ॥
श्रुत्वा तदीयं वचो वीतरागः स्मेराननो यस्करीन्द्रोपि धीरः ।
मन्दस्वरालापशीलोऽथतस्मै प्रत्युत्तरं दातुमौत्क्यं प्रपेदे ॥ ५३ ॥
हंहो महात्मन् किमित्थं ब्रवीषि त्वं मे कृते जातसौहार्दलेशः ।
नाहं भवदत्तशिक्षानुकूलं कर्त्तुं समर्थोस्मि कृत्यं कदाचित् ॥ ५४ ॥
वाञ्छामिनो तावकं द्रव्यजातं नाऽऽस्था[1] मदीयात्र जाताकदापि ।
आस्तामिदंसर्वदात्वत्सकाशे न स्वापतेयेमदीयोधिकारः ॥ ५५ ॥
श्रीमान् यथाभिक्षुवेशोपिभूत्वा सांसारिकव्यापृतिव्यापृतात्मा ।
मुग्धो[2]स्ति संन्यासिकृत्येष्विदानीं मांचापिकिंकर्त्तुकामस्तथैव ॥ ५६ ॥
सम्पद्दला[3]ढ्याद्यतो मे महात्मन् दिष्ट्या[4]व लब्धा हि निष्क्रान्ति रद्य ।
भूयोपि तत्रैव पातं विदध्यां किं तावकीनानुरोधेन हन्त ॥ ५७ ॥
त्वल्लोभवाङ्[5]मण्डलाग्रो न [6]मावन् वैराग्य[7]कूर्पासभेदे पटीयान् ।
अत्रास्ति यत्नो मुधा तावकीनः साफल्यभाक्बोधिसत्त्वे हि हीनः ॥ ५८ ॥

१—आस्था, अपेक्षा यत्नोवा-आस्था त्वलम्बनस्थानयत्नापेक्षासु योषिति इति मेदिनी ।

२—मुग्धोमूढः--मुग्धस्तु सुन्दरे मूढे, इति विश्वः ।

३—दलाढ्याद् (दलदलेति नागरभाषायां प्रसिद्धात्) पङ्ककर्वटात्, दलाढ्येपङ्ककर्वटः, इति त्रिकाण्डशेषः ।

४--दिष्ट्या हर्षे मङ्गलचेति मेदिनी ।

५—मण्डलाग्रः-तरवारिः—तरवारिकौक्षेयकमण्डलाग्रा इति हेमचन्द्रः ।

६—मावन् । श्रीमन् ।

७—कूर्पासः कञ्चुकः, अर्धचोलकोवानिचोलःस्यात्कूर्पासोवारवाणश्च कञ्चुकः इति हेमचन्द्रः । कूर्पासस्त्वर्धचोलक इति हारावली ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

किं मानवं देहमासाद्य विद्वांश्चाप्यङ्ग संसारमध्ये विदध्यात् ।
कार्यं स्वयं बन्धहेतुं मनस्वी कारांप्रतिप्रस्थितिः कस्य वेष्टा ॥ ५९ ॥
यस्यां स्थितौ येन पूर्वं बुधेन स्वात्मानुकूलं फलं नानुभूतम् ।
तत्रैवतस्येष्टसिद्धिप्रसिद्धिः सम्भावनीयाकथंकारमद्धा ॥ ६० ॥
वर्णाश्रमाणांव्यवस्थानुरूपं कार्यं वितन्वन्हिलोकःसुखीस्यात् ।
संन्यासिनाभैक्षचर्याप्रियेण श्रीसंग्रहः किं विधेयो हिताय ॥
त्यक्त्वापि गार्हस्थ्यमाहो मनुष्यास्तत्रोपयुक्तानि वस्तूनिकस्मात् ।
गृह्णन्ति सानन्दमाम्नायशून्याः कश्छर्दितं सेवते वा विवेकी ॥ ६२ ॥
सांसारिकाऽऽहार्यवस्तूपरागः कार्यो न सन्न्यासिलोकेन जातु ।
इत्यस्ति शास्त्रानुकूलोपदेशः कल्याणदोऽस्मत्कृते वा गुरूणाम् ॥६४॥
वित्तैषणादिप्रभावोजनेऽस्मिन् जातोमनाङ्नापिबाल्यस्थितेऽपि ।
यत्कारणात्तातसम्पत्तिवृन्दं त्यक्त्वासुखं संश्रिता भिक्षुतेयम् ॥ ६५ ॥
त्वत्संपदापेक्षयाभूरिसम्पद्वप्तुर्[१]गृहेत्यक्तवानस्मियोऽहम् ।
तं मां भवाँल्लोभिनं वेत्ति किन्नु प्रावोचताऽसाम्प्रतं साम्प्रतं यत् ॥६६॥
यत्काङ्क्षया लौकिकं सर्व[२]सौख्यं त्यक्तं मया तस्यसिद्धिः कथं स्यात् ।
चेतोऽभिलाषस्ययुष्मत्समीपे व्याहृत्य चैवं यतीशोव्यरंसीत् ॥ ६७ ॥
साश्चर्यमेवं तदुक्तिं निशम्य प्राहाथ वाग्मीश्वरं तं मठी सः ।
का तेमनःकामना कल्पिताभूद्यद्धेतुकेयं विरक्तिप्रसक्तिः ॥ ६८ ॥
यत्प्राप्तितोजायतेमोक्षसिद्धिर्यामापणीयाचनिष्कामभावैः ।
सैवाद्य मे मार्ग्यते योगविद्या सांसारिकक्लेशविच्छेदहृद्या[३] ॥६९॥
इत्यादिवाक्यैर्मठाधीशशङ्कां प्रत्यादि[४]शत्तापसेन्द्रोऽथसम्यक् ।
जोशीमठं द्रष्टुकामः पुनःसमायात्ततः सत्सुमान्यः परेद्युः ॥७०॥

१—वप्तुः पितुः, पिता जनयिता वप्ता, इति त्रिकाण्डशेषः ।

२—सुखमेवसौख्यं स्वार्थेयञ्प्रत्ययः । सुखं सौख्यमितिद्विरूपकोशः ।

३—हृद्यंजवनेऽथत्रिषुहृज्जहृद्धितहृत्प्रिये, इतिमेदिनी । हृद्यं धमलजीरे च हृत्प्रिये हृद्भवेऽपिचेति विश्वश्च ।

४—प्रत्यादेशोनिराकृतिः, इत्यमरः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यः सज्जनो यं पदार्थं स्वबुद्ध्या निस्सारताभाजनं वेदयित्वा ।
सन्त्यक्तवानागमाभ्याससुज्ञः भूयोऽपि तद्ग्राहयेत्तेन कोऽज्ञः ॥७१॥
कामं त्यजेदुष्णतां जातवेदा उर्वी तथा गन्धवत्त्वं जहातु ।
धावन्तु वा रेलवद्भूभृतोपि सन्धाक्षतिः स्यान्न सूरेस्तथापि ॥७२॥
यो मानवो भोगभुक्तेर्निमित्तात् सन्त्यज्य वर्णाश्रमीयं विचारम् ।
दुर्वासनादूषितात्मा प्रयत्नं सम्पादयेद्दुष्कृतौ सोऽत्र चाच्यः ॥७३॥
नो निश्चितो यस्य नुर्वा विचारः सम्भाव्यतां तस्य गोत्रेऽपि शङ्का ।
किं कृत्रिमं रत्नजातं कदाचित् खान्युद्भवत्वप्रमाणे पटीयः ॥७४॥
उपनिषत्परिशीलनतत्परैः प्रणववाच्यविचारगतक्षणैः ।
विदितयोगनिगूढरहस्यकैः सममयंसमगंस्त समञ्जसम् ॥ ७५ ॥

इति मुनिचरितामृते नवमोविन्दुः॥



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ मुनिचरितामृते दशमो विन्दुः ।

अथो योगाभ्यासप्रगुणगतिमासाद्य गुणवान्,
ययौ बद्रीनारायणसमभिधं तीर्थममलम् ।
मठाधीशेनासौ समगत सुविज्ञेन मतिमान्
समाभाष्याऽऽमोदं परमुपगतश्चारुवचनः ॥ १ ॥

गिरौ योग्यो योगिव्रज इह मयावश्यमधुना,
समालोक्यो गत्वाऽभिमतफलकामेन परमाम् ।
प्रतिज्ञां कृत्वेमां दिन[1]मणिसमुन्मेषसमये.
ततः प्रस्थनाय प्रविततसमुद्युक्तिरभवत् ॥ २ ॥

प्रयातस्तस्याग्रे गिरिसविध[2]भूमौ यतिहरे
र्हिमानीपूर्णापा शकलितपयोभा पृथुतटा ।
सितग्रावग्रामाऽनुमितरजतप्रोततलिका,
मनोहाराऽऽकारा विमल-चलधारा सरिदभत् ॥३॥

महीध्रान्ते दान्तः शशधरसमानोंशुकधरः,
सरित्स्रोतस्थानं प्रतिकृतगमःपाररुचिकः ।
[3]जिहानः प्रालेयप्रकरनिचितप्रान्तविपिने ।
समालोकिष्टासौ किमपिपुरतो गोमुखपदम् ॥ ४ ॥

यदा गन्तुं सोऽग्रे कृतसमभिलाषोऽजनि तत-
स्तदामर्गद्रष्टुं प्रहितनयनोहन्तपरितः।
घनप्रालेयाढ्यं सकलमपि निष्क्रान्तिविषयम्,
परिज्ञायाऽऽशोचन्निव चिरमभच्चित्रित इव ॥ ५ ॥

१—दिनमणिर्भानुः—खगपतङ्गवियन्मणिभानवो हरिभगेनानिदाघकराद्रयः । किरणमालिविरोचनहेलयोदिनमणिस्तरणिश्चदिनप्रणीरितिहारावली । २-संविध-समीपम्—पार्श्वे समीपं संविध मित्यादि हेमचन्द्रः । ३—जिहानो गच्छन्

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

जिघत्सा[1]प्राबल्याच्छिथिलतरगात्रो यतिवर-
स्तदानीं शीतार्तः प्रतनुवसनो नग्नचरणः ।
समीरेणाप्याहो शिशिरकणसम्पर्कसुयुजा,
बबाधे चात्यर्थं प्रबलरिपुवत्कष्टसमये ॥ ६ ॥
क्षुधारोगोपायं हिमशकल[2]भुक्तिं सच यमी,
विनिश्चित्य क्षिप्रं विहितयतनो व्यापृतिचणः ।
क्षुधाभूतोपायः परमयमभूत्तत्र विषये
प्रयुक्तास्थाने वा कृतिरपि समर्था फल[3]जनौ ॥ ७ ॥
कथं कारं पारं तुहिनचितवारो नु सरितः,
प्रयायां शीतालुर्विकृतनिखिलाङ्गोऽहमधुना ।
यती वारं वारं चिरमिति विचारं विरचयन्,
निमेषव्यापारस्मरणमपि लेभे नहि तदा ॥ ८ ॥
समुद्योगी योगी कथमपि तदीयाऽपरतटं,
हिमानीसंश्लेषोद्भवरुधिरसक्ताङ्घ्रियुगलः ।
सरोमाञ्चाङ्गोऽसौ कटकटितदन्तावलिरणः[4]
स्रवद्वानासाग्रः[5] समसददजस्रं जितवपुः ॥ ९ ॥
तटिन्या मध्येऽयं शिशिरनिगडायत्तपुरक[6]-
स्तपस्वी विश्रामं विधुरितमनाःकर्त्तुममठत् ।
क्षणंमूर्छापन्नोऽभवदथसुचेताः समजनि,
सदा वैकावस्था भवति नहि कस्यापि जगति ॥१०॥
परं मूर्छायां यो विपदनुभवो नो समभवत्,
स चैतन्ये भूयो द्विगुणित इवाऽस्याविरभवत् ।

१—जिघत्सा क्षुधा-बुभुक्षाशनायाजिघत्सा रोचको रुचिरिति हेमचन्द्रः ।

२—भित्तं शकलखण्डे वा पुंस्यर्धं इति, अमरः ।

३—फलजनौ फलोत्पादे । ४—रणः क्वणः, रणः—कोणे क्वणेपुंसिसमरेपुंनपुंसकम् । ५—नासा नासिका—गन्धज्ञा नासिका नासा घ्राणं घोणा विकूणिका, इति हेमचन्द्रः ६—पुरं शरीरम्—पुरं पाटिलीपुत्रेऽङ्गे गुग्गुलौ तु पुमानयम्, इतिरभसः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुणः कश्चैतन्ये [1]विधुरगणहानं नहि यतो,
वरं मूर्छैवातस्तदवगतिशङ्काविरहिता ॥ ११ ॥
चिरंकालं यावद्धिममयभुविस्थातुमहितं,
हितज्ञोज्ञात्वैतं गमनकरणेसज्जितमनाः ।
समुत्थातुं वाञ्छन्नपि विकलपादः पुनरपि,
पपातच्छिन्नां[2]हि स्तरुवर इवैषोऽतनुतनुः[3] ॥ १२ ॥
उपायज्ञः सर्वाण्यपि च वसनान्यागमपटु
र्यथास्वं बध्वासौ चलनयुगले शैत्यशिथिले ।
प्रगन्तुं वा ऽशक्तो ऽस्मयमयमनास्तत्र सरित-
स्तटेतिष्ठन्नैच्छच्छरणमसुरक्षाहितमथ ॥ १३ ॥
तदा प्रत्यासन्ने गिरिवसतिकौ का अपि नरौ,
समागत्या मुष्मैऽप्रणतिततिमाभुग्नशिरसौ।
प्रचक्राते सभ्यौ निटिलतटचुम्ब्यञ्जलिपुटं
तदास्थां च ज्ञात्वा सविनयमिदं तं जदतुः ॥ १४ ॥
महात्मन्नावाभ्यां चलतु कृपया नोऽद्य सदने,
यतः श्रीमत्सेवाऽमृतफलवशाज्जीवनमदः ।
कृतार्थं जायेत प्रथितचरितानामपि गुरो!
भवादृक्षाधीनं भवति कृपणेभ्योऽपि हि हितम् ॥१५॥
निशम्येत्थं वाक्यं विनयसहितं तापसवर-
स्तयोः श्रद्धाभाजोः प्रतिवचनमाधात्प्रमुदितः ।
प्रसन्नोऽहं वत्सौ व्यवहृतिविशेषात्सकुशलौ,
युवांभूयास्तन्नो प्रभुरहमितो गन्तुमधुना ॥ १६ ॥
मदीयावाञ्छासिद्धपथमुपयातुं यदभवत्,
परंतत्साफल्यं मृषयतितरां नोहतविधिः ।
नवा वा तद्दोषो निजकृतिवशात्सोऽपिफलति,
स्वयंकृत्वा गर्त्तं पथिपतनरोषः क्वचभवेत् ॥ १७ ॥

१—वैकल्येऽपिच विश्लेषे विधुरं विकले त्रिषु, इतिलिंगाणडशेष ।
२=अंहिः वृक्षमूलम्-अंहिःपदे वृक्षमूलेचेतिशब्दस्तोमः —
३—तनुःकायेत्वचि स्त्रीस्यात्त्रिष्वल्पे विरले कृशे, इति मेदिनी ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वरीवर्त्तीच्छा ते मुनिवर यतस्तत्रभवतः,
प्रयातुं तीर्थे भो वयमपि समुत्काः स्म गमने ।
त्वया साकं साकं चल लघु चिरं मास्मकुरुथाः,
पुनः पान्थाएवं निजगदतुरेनंसनिपुणम् ॥ १८ ॥
कृतज्ञोऽहं भद्रावजनिषितरां वा सुपथिकौ,
समर्थःप्रस्थातुं पदमपिनवा साम्प्रतमहो ॥
अतःकालक्षेपःक्षणमपिनकार्योममकृते, ।
भवद्भ्यांप्रस्थानंझटितिचविधेयंप्रतिगृहम्॥१९॥
चिरंदुःखावस्थां प्रभवति जनोऽयं कथमपि,
न सोढुं सामर्थ्यंप्रविकलशरीरोऽत्र [1]विषये ।
हिम[2]प्राये स्थानेमरणशरणं वाञ्छतिहृदा,
गुणः कस्तैः प्राणैर्ददतिविधुरं ये प्रतिपलम् ॥२०॥
तत्रः किञ्चित्स्वास्थ्यं परमधृतिरासाद्यशनकै-
र्यतीशः सोत्साहं विहितवसुधातीर्थ[3]वसतिः ।
प्रभाते यत्त्यक्तं पुनरपि तदेवाश्रमपदं,
प्रदोषे स प्रापद् वलवतिविधौ को न [4]परवान् ॥२१॥
मठाध्यक्षेनाथो प्रतनितमुदा रावलबुधा,
कृतालापः प्रातर्गमनमकरो[5]दाश्रुतगुणः ।
निशायां कुत्राऽपि प्रहतमदनस्यागतवतः,
कुटीरं चैकान्ते समलभत कस्याऽपि च यतेः ॥२२॥
ऋषिप्रायस्यायं विदितसुविचारोऽस्य विदुषः,
पुनः स्वीयान् भावान् सदयहृदयो धर्म्मविषये ।

१–विषयो देशः–विषयो गोचरे देशे तथाजनपदेऽपि च प्रबन्धाद् यस्य योज्ञातस्तत्र रूपादिकेपुमानितिमेदिनी ।

२–प्रायो बहुल्यतुल्ययोरिति धरणिः ।

३–वसतिः अवस्थानम् । वसतिःस्यादवस्थाने निशायां सदनेऽपिचेति हेमचन्द्रः ।

४–परतन्त्र; पराधीनः परवान् नाथवानपीति, अमरः ।

५–आश्रुता अंगीकृता गुणायेन यद्वाऽऽश्रुताआकर्णिता गुणायेन सः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रचक्रे [६]शुद्धात्मा गुणिगणनुतो वा दृढतरान्,
महद्भिः सम्पर्कः सकृदपि गुणः सज्जनकृते ॥२३॥
समुत्थायाऽन्येऽद्यु र्विरचितसमावश्यकविधि-
र्विभाते सञ्जाते श्रुतिविहितकर्माभ्यसनवान् ।
प्रतस्थे प्रेक्षावानभिमतफलाकाङ्क्षणपरः,
पदातिः सैकाकी गिरिवनदुरुल्लङ्घ्यपथतः ॥२४॥
प्रसिद्धं रामाख्यं पुरमयमगा[७]त्सायसमये ।
परिश्रान्तःशान्तःकुहचिदथरामाख्ययतिनः ।
मठे वासं तेने सकलसुविधाकाम्यविरतौ
विरक्तस्यज्ञानी[८]विदथगणवन्द्याङ्घ्रियुगलः ॥२५॥
यदावासे वासं व्यरचयत पुण्ये बहुसुखं,
[९]त्रियामायामाप्तः शयनसमये देवनरवम् ।
उपाश्रौषीत्तस्य प्रकटितविरक्तेरपि सतो,
विधेर्बन्धश्चित्रः प्रथयतिकलङ्कं विधुरपि ॥२६॥
समाधित्सुश्चापि व्रजति नहि वाञ्छासफलतां,
[१]वराकोऽयं साधुर्घटयति शुचं तद्बहुविधाम् ।
अबोधीत्थं तेन प्रगुणगुणभाजाथ यमिना,
प्रयत्नव्यर्थत्वे समुचित[२]मुताहो हि रुदितम् ॥२७॥

६—शुद्धःपवित्र आत्मा मनो यस्यसः—आत्मायत्नोधृतिर्बुद्धिःस्वभावो ब्रह्मवर्त्मचेतिधरणिः ।

७—सायसमये सायंकाले—सायः काण्डापराह्णयोरिति विश्वः ८-विदथा योगिनः कृतिनो वा—विदथो योगिकृतिनोरितिमेदिनी ।

९—त्रियामा रात्रिः—निशानिशीथिनीरात्रिस्त्रियामा क्षणदाक्षपेत्यमरः ।

१—वराकः शोचनीयः वराकः शंकरे पुंसि शोचनीयेऽभिधेयवत्, इति मेदिनी ।

२—आहो उताहो द्वावेतौ परिप्रश्नविचारयोरितिविश्वः ! उताहो यदिवा यद्वा किंवा वेति समा इमे इतिपुरुषोत्तमः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदाहुर्द्रोणाद्यं स्थविरपुरुषाः सागरपरं,
परंतीर्थं गत्वा परमरमणीयं शरदृतुम् ।
व्यतीयाय श्रीमानुपचितविवेकः पुनरसौ,
कदाचिच्चित्ते स्म प्रकटयति हा भावमशुचम् ॥२८॥
३मुधाभूतोदेहः किमिति फलमुत्पादयति मे,
सुनिःसङ्गोऽहन्तु श्रुतिरिति भृशं बोधयति नः।
अतोऽयं संत्याज्योहिमगिरिगुहायामति४लघु,
स्वयं ज्ञात्वा बन्ध५व्यसनमपि को नाऽत्र भजते ॥२९॥
व्यवस्थां शास्त्राणां चिरमणुकबुद्धिर्विजनगः,
श्रुतिश्रद्धापन्नः स्मयमयकलङ्काप्तिरहितः ।
विधायाऽसौ भूयोऽशिथिलयदलीकव्यवहृते,
र्विचारं तं पूर्वंनिगमसमयाऽत्यन्त६विरतम् ॥३०॥
मुरादावादादिं निगमगणमालोक्य पुरतः,
समायातं मार्गे गढनिकटगङ्गातटमगात् ।
तदा केचिद् ग्रन्थाविविधविषयास्तस्य सविधे
बभूवुः ७सद्यस्काः पठिति८समनूकस्यविदुषः ॥३१॥
ततोनाडीचक्रप्रभृतिविषये शङ्कितमनाः
शवं गङ्गामध्यान्निरगमयताऽसौ कमपि वै ।
क्षुराधाराद्वारा ९विशयविषवैद्यैकनिपणः
परीक्षायाहेतोः शकलितमकार्षीच्चनितराम् ॥३२॥

३—व्यर्थके तु वृथा मुधा इत्यमरः ।

४—अतिलघु अतिशीघ्रम् ।

५—व्यसनं निष्फलोद्यमे—दैवाऽनिष्टफले सक्तौ स्त्रीपानमृगयादिषु इति हेमचन्द्रः ।

६—विरतम् राहितम् ।

७—सद्यस्का नूतनाः नवं नवीनं सद्यस्कं प्रत्यग्रं नूत्ननूतने इति हेमचन्द्रः।

८—पठितिसमनूकस्य पठनशलिस्य, अनूकन्तु कुले शीले पुंसिस्याद्गात-जन्मनि इतिमेदिनी । ९—विशयः संशयः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्व संन्यासी लोकः परमशुचिवेषः श्रुतिधरः,
पिशाचाद्यैः साध्या क्व च कुणपखण्डश्रमकृतिः ।
यथार्थेप्सातन्त्रो ऽगणयद्हितं तत्र स नवा,
विनिश्चेतुं तत्त्वं विरचयति किं किं न[१०]सुमनाः ॥३३॥
[११]पराचीनान् बुद्ध्वा तदनुभवतःसूक्ष्ममतिको,
नवीनान्ग्रन्थांस्तान् सुरसरिति सोऽपातयत च ।
भ्रमोत्पादान् सर्वान् कुणपसहितान्सत्त्वरहितान्,
प्रवृत्तिर्धीराणां शरणयति सिद्धोपकरणम् ॥३४॥
फरुक्खाबादाख्यप्रभृतिनगरालोकनमथो,
अयं कृत्वारामक्षितिरससुधादीधितिमिते ।
[१२]युगांशे काशीं स प्रथितबुधसेव्यां शिवगृहां,
जगत्ख्यातख्यातिं समुदमगमद्भिक्षुकवरः ॥३५॥
गुहायां कस्याञ्चित्स च शिवनगर्य्याःसुनिकटे,
महद्भिर्विद्वद्भिः प्रकटितमुहुःसङ्गतिसुखः ।
मनाक्कालं स्थित्वोंजपकृतमनोबोधसहितः
पुरोगः साधूनां सुकृतिरथचाण्डालगढमैतत् ॥३६॥
स दुर्गालोहाख्यप्रमुखसदनं प्राप्य विजनं,
पयःप्राणाधारः प्रणवमननव्यापृतमनाः ।
तपस्वी योगाङ्गच्छलकृतनिबन्धान् बहुविधान्,
पठन् कालं निन्ये कमपि कमनीयव्रतपरः ॥३७॥
[१]अनुद्विग्नो धीमान् [२]निगमसमयज्ञोऽपि सयमी,
कथं चिद् भङ्गाया व्यसनपरतामापदहह ।

१०—सुमनाः पण्डितः—सुमनःस्त्रीपुष्पजात्योर्देवेपण्डितयोः पुमान् इति मङ्खः ।

११—पराचीनं पराङ्मुखम् इतिहेमचन्द्रः ।

१२—कालग्रन्थिसमाः संवन्मासमालो युगांशक इतिहारावली ।

१—उद्विग्नो भ्रान्तमानसः, इतिवैजयन्ती ।

२—निगमानां वेदानां समयान् सिद्धान्तान् जानातीति सः निगमो—

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यः सज्जनो यं पदार्थं स्वबुद्ध्या निस्सारताभाजनं वेदयित्वा ।
सन्त्यक्तवानागमाभ्याससुज्ञः भूयोऽपि तद्ग्राहयेत्तेन कोऽज्ञः ॥७१॥
कामं त्यजेदुष्णतां जातवेदा उर्वी तथा गन्धवत्त्वं जहातु ।
धावन्तु वा रेलवद्भूभृतोपि सन्धाक्षतिः स्यान्न सूरेस्तथापि ॥७२॥
यो मानवो भोगभुक्तेर्निमित्तात् सन्त्यज्य वर्णाश्रमीयं विचारम् ।
दुर्वासनादूषितात्मा प्रयत्नं सम्पादयेद्दुष्कृतौ सोऽत्र वाच्यः ॥७३॥
नो निश्चितो यस्य नुर्वा विचारः सम्भाव्यतां तस्य गोत्रेऽपि शङ्का ।
किं कृत्रिमं रत्नजातं कदाचित् खान्युद्भवत्वप्रमाणे पटीयः ॥७४॥
उपनिषत्परिशीलनतत्परैः प्रणववाच्यविचारगतक्षणैः ।
विदितयोगनिगूढरहस्यकैः समयसंसमगंस्त समञ्जसम् ॥ ७५ ॥

इति मुनिचरितामृते नवमोविन्दुः॥



CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ मुनिचरितामृते दशमो विन्दुः ।

अथो योगाभ्यासप्रगुणगतिमासाद्य गुणवान्,
ययौ बद्रीनारायणसमभिधं तीर्थममलम् ।
मठाधीशेनासौ समगत सुविज्ञेन मतिमान्
समाभाष्याऽऽमोदं परमुपगतश्चारुवचनः ॥ १ ॥

गिरौ योग्यो योगिव्रज इह मयावश्यमधुना,
समालोक्यो गत्वाऽभिमतफलकामेन परमाम् ।
प्रतिज्ञां कृत्वेमां दिन[1]मणिसमुन्मेषसमये,
ततः प्रस्थनाय प्रविततसमुद्युक्तिरभवत् ॥ २ ॥

प्रयातस्तस्याग्रे गिरिसविध[2]भूमौ यतिहरे
र्हिमानीपूर्णापा शकलितपयोभा पृथुतटा ।
सितग्रावग्रामाऽनुमितरजतप्रोततलिका,
मनोहाराऽऽकारा विमल-चलधारा सरिदभत् ॥३॥

महीध्रान्ते दान्तः शशधरसमानोंशुकधरः,
सरित्स्रोतस्थानं प्रतिकृतगमःपाररुचिकः ।
[3]जिहानः प्रालेयप्रकरनिचितप्रान्तविपिने ।
समालोकिष्टासौ किमपिपुरतो गोमुखपदम् ॥ ४ ॥

यदा गन्तुं सोऽग्रे कृतसमभिलाषोऽजनि तत-
स्तदामर्गद्रष्टुं प्रहितनयनोहन्तपरितः।
घनप्रालेयाढ्यं सकलमपि निष्क्रान्तिविषयम्,
परिज्ञायाऽऽशोचन्निव चिरमभच्चित्रित इव ॥ ५ ॥

१—दिनमणिर्भानुः—खगपतङ्गवियन्मणिभानवो हरिभगेननिदाघकराद्रयः । किरणमालिविरोचनहेलयोदिनमणिस्तरणिश्चदिनप्रणीरितिहारावली । २-संविध-समीपम्—पार्श्वं समीपं संविध मित्यादि हेमचन्द्रः । ३—जिहानो गच्छन्

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

जिघत्सा[1]प्राबल्याच्छिथिलतरगात्रो यतिवर-
स्तदानीं शीतार्तः प्रतनुवसनो नग्नचरणः ।
समीरेणाप्याहो शिशिरकणसम्पर्कसुयुजा,
बबाधे चात्यर्थं प्रबलरिपुवत्कष्टसमये ॥ ६ ॥
क्षुधारोगोपायं हिमशकल[2]भुक्तिं सच यमी.
विनिश्चित्य क्षिप्रं विहितयतनो व्यापृतिचणः ।
क्षुधाभूतोपायः परमयमभूत्तत्र विषये
प्रयुक्तास्थाने वा कृतिरपि समर्था फल[3]जनौ ॥ ७ ॥
कथं कारं पारं तुहिनचितवारो नु सरितः,
प्रयायां शीतालुर्विकृतनिखिलाङ्गोऽहमधुना ।
यती वारं वारं चिरमिति विचारं विरचयन्,
निमेषव्यापारस्मरणमपि लेभे नहि तदा ॥ ८ ॥
समुद्योगी योगी कथमपि तदीयाऽपरतटं,
हिमानीसंश्लेषोद्भवरुधिरसक्ताङ्घ्रियुगलः ।
सरोमाञ्चाङ्गोऽसौ कटकटितदन्तावलिरण[4]
स्रवद्वानासाग्रः[5] समसददजस्रं जितवपुः ॥ ९ ॥
तटिन्या मध्येऽयं शिशिरनिगडायत्तपुरक[6]-
स्तपस्वी विश्रामं विधुरितमनाःकर्तुममठत् ।
क्षणंमूर्छापन्नोऽभवदथसुचेताः समजनि,
सदा वैकावस्था भवति नहि कस्यापि जगति ॥१०॥
परं मूर्छायां यो विपदनुभवो नो समभवत्,
स चैतन्ये भूयो द्विगुणित इवाऽस्याविरभवत् ।

१—जिघत्सा क्षुधा-बुभुक्षाशनायाजिघत्सा रोचको रुचिरिति हेमचन्द्रः ।
२—भित्तं शकलखण्डे वा पुंस्यर्धं इति, अमरः ।
३—फलजनौ फलोत्पादे । ४—रणः क्वणः, रणः—कोणे क्वणेपुंसिसमरेपुंन पुंसकम् । ५—नासा नासिका—गन्धज्ञा नासिका नासा घ्राणं घोणा विकूणिका, इति हेमचन्द्रः ६—पुरं शरीरम्=पुरं पाटिलीपुत्रेऽङ्गे गुग्गुलौ तु पुमानयम्, इतिरभसः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुणः कश्चैतन्ये [1]विधुरगणहानं नहि यतो,
वरं मूर्छैवातस्तदवगतिशङ्काविरहिता ॥ ११ ॥
चिरंकालं यावद्धिममयभुविस्थातुमहितं,
हितज्ञोज्ञात्वैवं गमनकरणेसज्जितमनाः ।
समुत्थातुं वाञ्छन्नपि विकलपादः पुनरपि,
पपातच्छिन्नां[2]हि स्तरुवर इवैषोऽतनुतनुः[3] ॥ १२ ॥
उपायज्ञः सर्वाण्यपि च वसनान्यागमपटु
र्यथास्वं बध्वासौ चलनयुगले शैत्यशिथिले ।
प्रगन्तुं वा ऽशक्तो ऽस्मयमयमनास्तत्र सरित-
स्तटेतिष्ठन्नैच्छच्छरणमसुरक्षाहितमथ ॥ १३ ॥
तदा प्रत्यासन्ने गिरिवसतिकौ का अपि नरौ,
समागत्या मुष्मैऽप्रणतिततिमाभुग्नशिरसौ।
प्रचक्राते सभ्यौ निटिलतटचुम्ब्यञ्जलिपुटं
तदास्थां च ज्ञात्वा सविनयमिदं तं जदतुः ॥ १४ ॥
महात्मन्नावाभ्यां चलतु कृपया नोऽद्य सदने,
यतः श्रीमत्सेवाऽमृतफलवशाज्जीवनमदः ।
कृतार्थं जायेत प्रथितचरितानामपि गुरो!
भवादृक्षाधीनं भवति कृपणेभ्योऽपि हि हितम् ॥१५॥
निशम्येत्थं वाक्यं विनयसहितं तापसवर-
स्तयोः श्रद्धाभाजोः प्रतिवचनमाधात्ममुदितः ।
प्रसन्नोऽहं वत्सौ व्यवहृतिविशेषात्सकुशलौ,
युवांभूयास्तन्नो प्रभुरहमितो गन्तुमधुना ॥ १६ ॥
मदीयावाञ्छासिद्धपथमुपयातुं यदभवत्,
परंतत्साफल्यं मृषयतितरां नोहतविधिः ।
नवा वा तद्दोषो निजकृतिवशात्सोऽपिफलति,
स्वयंकृत्वा गर्त्तं पथिपतनरोषः क्वचभवेत् ॥ १७ ॥

१—वैकल्येऽपिच विश्लेषे विधुरं विकले त्रिषु, इतित्रिकाण्डशेष ।
२=अंहिः वृक्षमूलम्-अंहिःपदे वृक्षमूलेचेतिशब्दस्तोमः —
३—तनुःकायेत्वचि स्त्रीस्यात्त्रिष्वल्पे विरले कृशे, इति मेदिनी ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वरीवर्त्तीच्छा ते मुनिवर यतस्तत्रभवतः,
प्रयातुं तीर्थे भो वयमपि समुत्काः स्म गमने ।
त्वया साकं साकं चल लघु चिरं मास्मकुरुथाः,
पुनः पान्थाएवं निजगदतुरेनंसनिपुणम् ॥ १८ ॥
कृतज्ञोऽहं भद्रावजनिषितरां वा सुपथिकौ,
समर्थःप्रस्थातुं पदमपिनवा साम्प्रतमहो ॥
अतःकालक्षेपःक्षणमपिनकार्योममकृते, ।
भवद्भ्यांप्रस्थानंझटितिचविधेयंप्रतिगृहम्॥१९॥
चिरंदुःखावस्थां प्रभवति जनोऽयं कथमपि,
न सोढुं सामर्थ्यमविकलशरीरोऽत्र [1]विषये ।
हिम[2]प्राये स्थानेमरणशरणं वाञ्छतिहृदा,
गुणः कस्तैः प्राणैर्ददतिविधुरं ये प्रतिपलम् ॥२०॥
तत्रः किञ्चित्स्वास्थ्यं परमधृतिरासाद्यशनकै-
र्यतीशः सोत्साहं विहितवसुधातीर्थ[3]वसतिः ।
प्रभाते यत्त्यक्तं पुनरपि तदेवाश्रमपदं,
प्रदोषे स प्रापद् बलवतिविधौ को न [4]परवान् ॥२१॥
मठाध्यक्षेनाथो प्रतनितमुदा रावलबुधा,
कृतालापः प्रातर्गमनमकरो[5]दाश्रुतगुणः ।
निशायां कुत्राऽपि प्रहतमदनस्यागतवतः,
कुटीरं चैकान्ते समलभत कस्याऽपि च यतेः ॥२२॥
ऋषिप्रायस्यायं विदितसुविचारोऽस्य विदुषः,
पुनः स्वीयान् भावान् सदयहृदयो धर्म्मविषये ।

१–विषयो देशः–विषयो गोचरे देशे तथाजनपदेऽपि च प्रबन्धाद् यस्य योज्ञातस्तत्र रूपादिकेपुमानितिमेदिनी ।

२–प्रायो बहुल्यतुल्ययोरिति धरणिः ।

३–वसतिः अवस्थानम् । वसतिःस्यादवस्थाने निशायां सदनेऽपिचेति हेमचन्द्रः ।

४–परतन्त्र; पराधीनः परवान् नाथवान्पीति, अमरः ।

५–आश्रुता अंगीकृता गुणायेन यद्वाऽऽश्रुताआकर्णिता गुणायेन सः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रचक्रे [६]शुद्धात्मा गुणिगणनुतो वा दृढतरान्,
महद्भिः सम्पर्कः सकृदपि गुणः सज्जनकृते ॥२३॥
समुत्थायाऽन्येऽद्यु र्विरचितसमावश्यकविधि-
र्विभाते सञ्जाते श्रुतिविहितकर्माभ्यसनवान् ।
प्रतस्थे प्रेक्षावानभिमतफलाकाङ्क्षणपरः,
पदातिः सैकाकी गिरिवनदुरुल्लङ्घ्यपथतः ॥२४॥
प्रसिद्धं रामाख्यं पुरमयमगा[७]त्सायसमये ।
परिश्रान्तःशान्तःकुहचिदथरामाख्ययतिनः ।
मठे वासं तेने सकलसुविधाकाम्यविरतौ
विरक्तस्यज्ञानी[८]विदथगणवन्द्याङ्घ्रियुगलः ॥२५॥
यदावासे वासं व्यरचयत पुण्ये बहुसुखं,
[९]त्रियामायामाप्तः शयनसमये देवनरवम् ।
उपाश्रौषीत्तस्य प्रकटितविरक्तेरपि सतो,
विधेर्बन्धश्चित्रः प्रथयतिकलङ्कं विधुरपि ॥२६॥
समाधित्सुश्चापि व्रजति नहि वाञ्छासफलतां,
[१]वराकोऽयं साधुर्घटयति शुचं तद्बहुविधाम् ।
अबोधीत्थं तेन प्रगुणगुणभाजाथ यमिना,
प्रयत्नव्यर्थत्वे समुचित[२]मुताहो हि रुदितम् ॥२७॥

६—शुद्धःपवित्र आत्मा मनो यस्यसः—आत्मायत्नोधृतिर्बुद्धिःस्वभावो ब्रह्मवर्म्मचेतिधरणिः ।

७—सायसमये सायंकाले—सायः काण्डापराह्णयोरिति विश्वः ८-विदथा योगिनः कृतिनो वा—विदथो योगिकृतिनोरितिमेदिनी ।

९—त्रियामा रात्रिः—निशानिशीथिनीरात्रिस्त्रियामा क्षणदाक्षपेत्यमरः ।

१—वराकः शोचनीयः वराकः शंकरे पुंसि शोचनीयेऽभिधेयवत्, इति मेदिनी ।

२—आहो उताहो द्वावेतौ परिप्रश्नविचारयोरितिविश्वः ! उताहो यदिवा यद्वा किंवा वेति समा इमे इतिपुरुषोत्तमः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदाहुर्द्रोणाद्यं स्थविरपुरुषाः सागरपरं,
परंतीर्थं गत्वा परमरमणीयं शरदृतुम् ।
व्यतीयाय श्रीमानुपचितविवेकः पुनरसौ,
कदाचिच्चित्ते स्म प्रकटयति हा भावमशुचम् ॥२८॥
[३]मुधाभूतोदेहः किमिति फलमुत्पादयति मे,
सुनिःसङ्गोऽहन्तु श्रुतिरिति भृशं बोधयति नः।
अतोऽयं संत्याज्योहिमगिरिगुहायामति[४]लघु,
स्वयं ज्ञात्वा बन्ध[५]व्यसनमपि को नाऽत्र भजते ॥२९॥
व्यवस्थां शास्त्राणां चिरमणुकबुद्धिर्विजनगः,
श्रुतिश्रद्धापन्नः स्मयमयकलङ्काप्तिरहितः ।
विधायाऽसौ भूयोऽशिथिलयदलीकव्यवहृते,
र्विचारं तं पूर्वंनिगमसभयाऽत्यन्त[६]विरतम् ॥३०॥
मुरादाबादादिं निगमगणमालोक्य पुरतः,
समायातं मार्गे गढनिकटगङ्गातटमगात् ।
तदा केचिद् ग्रन्थाविविधविषयास्तस्य सविधे
बभूवुः [७]सद्यस्काः पठिति[८]समनूकस्यविदुषः ॥३१॥
ततोनाडीचक्रप्रभृतिविषये शङ्कितमनाः
शवं गङ्गामध्यान्निरगमयताऽसौ कमपि वै ।
क्षुराधाराद्वारा [९]विशयविषवैद्यैकनिपुणः
परीक्षायाहेतोः शकलितमकार्षीच्चनितराम् ॥३२॥

३—व्यर्थके तु वृथा मुधा इत्यमरः ।

४—अतिलघु अतिशीघ्रम् ।

५—व्यसनं निष्फलोद्यमे—दैवाऽनिष्टफले सक्तौ स्त्रीपानमृगयादिषु इति हेमचन्द्रः ।

६—विरतमू राहितम् ।

७—सद्यस्का नूतनाः नवं नवीनं सद्यस्कं प्रत्यग्रं नूत्ननूतने इति हेमचन्द्रः।

८—पठितिसमनूकस्य पठनशलिस्य, अनूकन्तु कुले शीले पुंसिस्याद्गत-जन्मनि इतिमेदिनी । ९—विशयः संशयः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्व संन्यासी लोकः परमशुचिवेषः श्रुतिधरः,
पिशाचाद्यैः साध्या क्व च कुणपखण्डश्रमकृतिः ।
यथार्थेप्सातन्त्रो ऽगणयदहितं तत्र स नवा,
विनिश्चेतुं तत्त्वं विरचयति किं किं न[१०]सुमनाः ॥३३॥
[११]पराचीनान् बुद्ध्वा तदनुभवतःसूक्ष्ममतिको,
नवीनान्ग्रन्थांस्तान् सुरसरिति सोऽपातयत च ।
भ्रमोत्पादान् सर्वान् कुणपसहितान्तत्त्वरहितान्,
प्रवृत्तिर्धीराणां शरणयति सिद्धोपकरणम् ॥३४॥
फरुक्खाबादाख्यप्रभृतिनगरालोकनमथो,
अयं कृत्वारामक्षितिरससुधादीधितिमिते ।
[१२]युगांशे काशीं स प्रथितबुधसेव्यां शिवगृहां,
जगत्ख्यातख्यातिं समुदयगमद्भिक्षुकवरः ॥३५॥
गुहायां कस्याञ्चित्स च शिवनगर्य्याःसुनिकटे,
महद्भिर्विद्वद्भिः प्रकटितमुहुःसङ्गतिसुखः ।
मनाक्कालं स्थित्वोंजपकृतमनोबोधसहितः
पुरोगः साधूनां सुकृतिरथचाण्डालगढमैतत् ॥३६॥
स दुर्गालोहाख्यप्रमुखसदनं प्राप्य विजनं,
पयःप्राणाधारः प्रणवमननव्यापृतमनाः ।
तपस्वी योगाङ्गच्छलकृतनिबन्धान् बहुविधान्,
पठन् कालं निन्ये कमपि कमनीयव्रतपरः ॥३७॥
[१]अनुद्विग्नो धीमान् [२]निगमसमयज्ञोऽपि सयमी,
कथं चिद् भङ्गाया व्यसनपरतामापदहह ।

१०—सुमनाः पण्डितः—सुमनःस्त्रीपुष्पजात्योर्देवपण्डितयोः पुमान् इति मङ्खः ।

११—पराचीनं पराङ्मुखम् इतिहेमचन्द्रः ।

१२—कालग्रन्थिसमाः संवन्मासमालो युगांशक इतिहारावली ।

१—उद्विग्नो भ्रान्तमानसः, इतिवैजयन्ती ।

२—निगमानां वेदानां समयान् सिद्धान्तान् जानातीति सः निगमो—

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विशेषज्ञोप्याहो अनि[1]पुणजनैः सङ्गमवशात्
कदाचिद्बालोवा[2] व्यवहरति वाऽशी[3]फरमिह ॥३८॥
उमा[4]संपर्क्यङ्गो जितरतिपतिः सेवितवृषो[5]
विभू[6]तिव्यासङ्गः शशधररुचिर्नाग[7]सहितः ।
निषेव्यायं भङ्गां विषमनयनो हर्षितमना
वराका[8]भिख्याऽगाद्धरइव ततो धारित[9]सरित् ॥३९॥
प्रयातस्तस्याग्रे प्रणयरसमूर्तिः परिचित-
स्तदा मध्येमार्गं मृदुलतरभावश्च मिलितः ।
क्वचिद् ग्रामे रात्रौ शिवसदनमासाद्य शयितः
स शुश्राव स्वप्ने गिरिशगिरिजालापमुदितम् ॥४०॥
युवापूर्णाङ्गोऽसौ मदनतुलिताकाररचनो
दयानन्दः स्वामिन्! परिणयतु चेत्कामपि वधूम् ।

वणिजे पुण्यौ कटे वेदे वणिक्त्रये इतिमेदिनी । समयाःशपथाचारकालसिद्धान्तसंविदः, इत्यमरः । समयः शपथे भाषासम्पदोः कालसंविदोः । सिद्धान्ताचारसंकेतनियमावसरेषु चेति हेमचन्द्रः ।

१– अनिपुणोऽनभिज्ञः–निष्णातो निपुणोऽभिज्ञ इति वैजयन्ती ।

२–बालो वा मूर्खइव, बालः कचे शिशौ मूर्खे, इतिविश्वः । वास्याद्विकल्पोपमयोर्वितर्के पादपूरणे । समुच्चये च विश्रम्भे नानार्थोतीतयोरपीति मेदिनी ।

३– अशीफरमरम्यं यथास्यात्तथा; शीफरं स्फीतरम्ययोरित्यजयः ।

४–उमा कान्तिः, शिवपत्ने-हैमवती (पार्वती) उमातसीहैमवतीहरिद्राकीर्तिकान्तिषु, इति विश्वः ।

५–वृषो धर्म्मः, पक्षे बलीवर्दः–वृषो धर्मे बलीवर्दे, इति मेदिनी ।

६–विशिष्टा भूतिर्विभूतिः–भूतिर्भस्मनि सम्पदीत्यमरः ।

७—नागो देहानिलविशेषः–पक्षेसर्पः–नागो मतङ्गजे सर्पे पुंनामे नागकेसरे । क्रूराचारे नागदन्ते मस्तके वारिदेऽपि च । देहानिलविशेषे च श्रेष्ठे स्यादुत्तरस्थित इति हेमचन्द्रः ।

८–वराकी साध्वी, अभिख्या शोभा संज्ञा वा यस्य सः, वराकः साधुशोच्ययोरिति वैजयन्ती । वराकः शंकरे पुंसि शोचनीयेऽभिधेयवत्, इतिमेदिनी ।

९–सरित्सूत्रं पक्षे नदी–(गङ्गा)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवेत्सा कल्याणी सुभगपतिसङ्गादयमपि
प्रहृष्टो भङ्गायाः सफलयतु हेवाककलनम् ॥ ४१ ॥
प्रजानाथं नाथं सविनयमिदं साञ्जलिपुटं-
सनिर्बन्धं वामा हिमगिरिसुताऽऽवेदितवती ।
अथो देवोऽस्थाने कथनमिति तस्या अचकथत्
प्रमाणीकुर्वीत प्रभुरवितथां वा किमु कथाम् ॥ ४२ ॥
सकृन्निद्राभङ्गोऽभवदवसरे तत्रभवतः
स्मृतस्वप्नोदन्तो बहलमनुतापं च गतवान् ।
तदा देवः शोचन्निव तमतिवर्षास्रसहितो
रुरावोच्चैर्घोरं व्यसनिकुलजं बान्धवइव ॥ ४३ ॥
ततो [1]वार्षीं मूर्त्तिं पृथुलतरतुन्दां स्फटिकभां
प्रपश्यँस्तन्मध्ये कमपि विलुलोकेऽहितजनम् ।
ग्रहीतुं हस्तेनाभिपलति च तस्मिन्नधिबले
पलायिष्ट क्षिप्रं हरिण[2]हृदयः सोऽ[3]धमनरः ॥ ४४ ॥
स्वयं तस्यां मूर्त्तौ समविश[4]दथो कौतुकपरः
सविश्रब्धं धीरो गिरिवरगुहायां हरिरिव ।
विभाते संजाते विगतशयनोऽभूदथ यमी
यथाकालं कार्यं भवति खलु सल्लक्षणयुजाम् ॥४५॥
मनाग्भुग्नग्रीवा क्षितितलगतं यौवनमणिं
स्वकंपश्यन्तीव स्खलितगमनास्थाविरभरात् ।
सती काचित्काशस्तवकरुचिकेशाऽत्रभवती
दधे श्रद्धापूर्वं शिववृषनिमित्तं दधिगुडम् ॥ ४६ ॥

१—वार्षीं वृषसम्बधिनीम्—वृषस्येयंवार्षी तां तस्येदमित्यण् टिड्ढाणञितिङीप् प्रत्ययः ।

२—हरिण हृदयो भीरुः ३—अधमः—निकृष्टप्रतिकृष्टावरेफयाप्यावमाधमाः । कपूयकुत्सितावद्यखेटगर्ह्याणकाः समा इत्यमरः । अधमः स्याद्गर्ह्यजन, इति च विश्वः ।

४—समविशत्—शयितः—

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दयाभाजा राजा सकलजगतां प्रेषितमसौ
विकारं [५]मत्कारेरुपशमयितुं स्वौषधमिव ।
विजानानः साधुश्चुलुकितमुखस्तत्सनिपुणं
निषेव्याभूच्छीघ्रं विजितविजयादुर्मदमदः ॥४७॥
ततोरेवास्रोतःसविधगमनेच्छः प्रचलितः
सुघोरे कान्तारे क्वचन पुरतः स्फारितमुखम् ।
[१]समर्य्यादायातं कृतभयदशब्दं शितिरुचं
महाभल्लं मल्लो यतिरतिगतिर्हुङ्कृतिधरः ॥४८॥
महासत्त्वो दृष्ट्वा धृतलगुडको रोषसहितः
प्रहर्त्तुं सोऽभ्यागादतुलधृतिकस्तत्र झटिति ।
मुधाटोपं कोपं कथमिव महावीरपुरुषः
सहेत क्रूरस्यापरहननवृत्तेरपि भटः ॥ ४९ ॥
महागर्वोऽप्याहो स च यमकृतिर्भल्लुकमृगः
समर्थो हुङ्कारध्वनिमपि न सोढुं समभवत् ।
प्रहारव्यापारं प्रतिकथनमेवास्तिविफलं
जिगीषोः कः स्थातुं प्रभवति पुरो वाऽत्र बलिनः ॥५०
कुटीरस्थाः केचिद्विदिततदुदन्ताः सकृदगु-
र्मनुष्याः सश्वानो[२] रुचितमृगयाः शस्त्रसहिताः ।
समन्तात्तत्रत्याः सदयहृदयास्तस्य यमिन-
स्तदारक्षाहेतोः सविनय मिदं तं च जगदुः ॥ ५१ ॥
महात्मन्मागास्त्वं बहुविधविपज्जालजटिले
वनेऽस्मिन्नेकः[३] शरणरहितः कोमलतनुः ।

५—मत्कोरभंगाया विकारं मादकतारूपम् ।

१—समर्य्यादायातम् समीपागतम् । समीपे निकटासन्नसंनिकृष्टसमीपवत् । सदेशाभ्याशसविधसमर्य्यादसवेशवत् । उपकण्ठान्तिकाभ्यर्णाभ्यर्णा अप्यभितोऽव्ययम् इति अमरः ।

२—सश्वानः—ससारमेयाः । रुचिता मृगया येभ्यस्ते—आच्छोदनं मृगव्यं स्यादाखेटो मृगया स्त्रियाम् इत्यमरः । ३शरण रहितो रक्षितृविहीनः+शरणं गृहादि-[illegible]योरपि, इति मेदिनी ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाक्रूराः सत्त्वाः सततमिह वासं विदधते
यतस्त्रातुं नालं शतधृतिसमो वापि पुरुषः ॥५२॥
अनादृत्यैवासौ कथनमिति तेषां नतिजुषां
महाभागः प्राज्ञः प्रकटितमहाधैर्य्यगुणकः ।
ततोलब्धं कञ्चिल्लगुडमपिहित्वाऽऽयततरां
भयं कस्मात्कुर्य्यात्सकलभयनाशैककुशलः ॥५३॥
ततश्चाग्रे गत्वा कथमपि सधीरो भवपतेः
[1]कृपाकोलद्वारा समुदतरदुद्योगसखिकः ।
विपत्सिन्धुं तां स च्युतरुधिरधाराऽऽचितवपुः
क्वचिद्ग्रामा[2]भोगे सघनतरुमासाद्य भगवान् ॥५४॥
महोत्तुङ्गं तस्य प्रविततलतं स्कन्ध[3]मणुधीः
समारुह्य स्वस्थं विकलनिखिलाङ्गोऽपि शनकैः ।
निशां शेषां निन्ये श्रुतविविधदुष्प्राणि[4]रसितः
सुवीरो विज्ञानी विपदमपि सौख्येन सहते ॥५५॥
पुनः प्रातःकाले भवति भगवद्ध्यानरुचिधृत्
तरोः [5]काण्डात्तस्मान्निपुणमवतीर्य्यामलजलाम् ।
नदीं काञ्चित्प्राप्य व्रणगणमथ क्षालितमसौ
व्यधान्मर्दं मर्दं व्यरचयत वा [6]मज्जनविधिम् ॥५६॥
कृताचामः सन्ध्यां विरचयितुकामः समभुवि
सरित्कूले शान्तः प्रणवजपशीलः शुचिमनाः ।

१—उडुपं तु प्लवःकोल इत्यमरः ।
२—आभोगःपरिसरः ।
३—अणुधीःसूक्ष्ममतिः—अणुर्व्रीहिविशेषेस्यात् पुंसिसूक्ष्मेऽभिधेयवत् इतिमेदिनी ।
४—रसितं रुतम्—रसितं स्वर्णादिलिप्ते रुतस्तनितयोरपि, इतिहेमचन्द्रः ।
५—काण्डं—स्कन्धः । काण्डं नालेतरुस्कन्धे बाणेऽवसरनीरयोरितिविश्वः ।
६—मज्जनं स्नानम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदासीनः सोऽभद् गिरिवसतिकाः केचन जना-
स्तदा गन्त्रीमन्तः सविनय मदोभ्याशमगमन् ॥५७॥
प्रणम्याऽऽनम्रास्ते सकलपथिकास्तं यतिवरं
गृहीत्वा तस्याज्ञां स्थितिमकलयन्नस्य च पुरः।
ततः कश्चिद् वृद्धो विनयनतमूर्धा शुभगति-
र्मुनिं प्राह प्राज्ञो विदिततदवस्थो दुरितभाक् ॥५८॥
मुने! शोच्यावस्था कथमजनि ते तत्रभवतो
व्रणव्रातव्याप्तं किमिति निखिलं गात्रमधुना।
ससीत्कारं श्वासः प्रचलतितरां किन्नु भवतः।
कुतस्त्यः क्वेदानीं गमनमपि कर्त्तुं रुचिरभूत् ॥५९॥
कृपालुः श्रद्धालो र्वचनमिति पीयूषगुणकं
विभाव्यासौ तुष्टो मुनिजनवरेण्यः प्रति[1]वचः।
यथावृत्तं दत्त्वा शिवभजनसंसक्तिमगमत्
मुधावाग्व्यापारं किमिव मितभाषी विरचयेत् ॥६०॥
ततस्तेऽध्वन्या स्वं गृहमभिगता [2]वार्त्तसहिताः
स्मरन्तस्तन्मूर्त्तेर्नयनसुभगायाः प्रतिपलम्।
अथो तेषां स्वामी कतिपयजनैरस्य पुरतः
समेत्योचे सभ्यः पुनरपिविशेषाग्रहपरम् ॥६१॥
गृहे नोऽस्माभिस्ते सममयि यते धार्मिकगुरो!।
कृपालो गन्तव्यं वयमपि यतस्तुच्छधिषणाः।
भवत्सेवायोगाज्जगति कृतकृत्याः स्वककुलं
पवित्रं जानानाः सफलमिह मन्येमहि जनुः ॥६२॥
भवद्भक्त्या तोषं व्रजति नितरां मामकमनः
कृपासिन्धो! स्थाने व्यवहृतिरियं ते गृहिवर।

७—गन्त्रीमन्तःकम्बलिवाद्यकवन्तः गन्त्री कम्बलिवाद्यकम्,--इत्यमरः।
१—प्रतिवचः,उत्तरम्। उत्तरं तु प्रतिवच इतिहेमचन्द्रः।
२—वार्तसहिताः कुशलयुताः वार्त्तं पाटवमारोग्यं भव्यंस्वास्थ्यमनामयमिति यादवः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यतस्त्वं मादृक्षं कृपणजनमालोक्य दयसे
निजं कर्त्तव्यं यः स्मरति पुरुषः सैव जयति ॥६३॥
प्रशंसन्नित्थं तं प्रियमितवचा ज्ञात ३समयं
तदोकः प्रस्थानं प्रतिकृतनिषेधप्रतिवचाः ।
सनिर्बन्धं भूयो भुवनहितकर्त्ताऽऽञ्जलियुजा
महाश्रद्धाभाजा सविनयमथोचे प्रणयिना ॥६४॥
किमानेयं स्वामिन्नशनमशितुं भोस्तवकृते
निदेशं कुर्य्यां मां प्रति करुणया पूज्यचरण ! ।
४भुजिष्ये सामीप्ये स्थितिमति सुयोग्येपरिवृढो
वृथा कष्टं सोढुं स्वयमिह यतेत त्वमिव कः ॥६५॥
पयःपानद्वारा भवतिवपुषोऽस्याङ्ग ! मतिमन् !
सुनिर्वाहोऽद्यत्वे भवतु यदि वाञ्छाऽऽनयतु तत्
उपासन्ने स्वाते बहलजलपूर्णे जलधरे
तृषार्त्तः १पप्पीहः किमिवभजतां मौनमहितम् ॥६६॥
समादिष्टः शिष्टः स चगृहिजनस्तेन यतिना
शनैरेवं सभ्यो झटिति सदनाद् दुग्धममलम् ।
समानीयाऽमुष्मै क्षुधितमुनयेऽदाद् विनयवान्
समन्तादग्निंस्म ज्वलयतितरां सद्भृतिभुजा ॥६७॥
नीत्वा रात्रिमथो सुखं सितमतिः सत्यप्रतिज्ञो मुनिः
प्रातःकालिककृत्यजातमखिलं कृत्वाभिरूपादरः ।
तस्मा२न्मेकलकन्यकापुलिनभूवास्तव्यसङ्गोत्सुकः
स्थानाद्यातमनल्पधैर्य्यनिलयश्चक्रे प्रसन्नाननः ॥६८॥

इति मुनिचरितामृते दशमो विन्दुः॥

३—ज्ञातसमयं विदिताचारम् ।
४—भुजिष्यः सेवके; परिवृढःस्वामी ।
१—पप्पीहःचातकः—चातकस्तोककोपप्पाहिःसारङ्गो नभोम्बुपः इतिहेमचन्द्रः
२—मेकलकन्यका नर्मदा—रेवातुनर्मदा—सोमोद्भवा मेकलकन्यका, इत्यमरः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ मुनिचारितामृत एकादशो विन्दुः

चरित्रयं यावदनूनबोधै रेवातटे योगिभिरागमज्ञैः ॥
कृत्वा निवासं धृतयोगसिद्धिर्विद्याभिलाषो मथुरां प्रतस्थे ॥ १ ॥
दाक्षीसुतव्याकृतितन्त्रविज्ञः पतञ्जलिप्रोक्तिविभावितज्ञः ।
ज्योतिर्विदां संसदि लब्धमानः सम्याप्तनैरुक्तजनाधिमानः ॥ २ ॥
कल्पागमानल्पमतिर्यतिर्यः शिक्षानिबन्धाप्तविशेषदीक्षः ।
छन्दोनिबन्धाब्धिमरालभूतः प्रभूतसाहित्यचणःप्रभूतः ॥ ३ ॥
वेदान्तसिद्धान्तनितान्तबोद्धा व्यासोपमो[१]व्यासमनोरोद्धा ।
यः सांख्यशास्त्रे कपिलानुकारी सत्कार्यवादोपवने विहारी ॥ ४ ॥
मीमांसको जैमिनियोगियोगः सद्योगवृत्तान्तविदांपुरोगः ॥
यस्तर्कविद्यानिधिजागरूकः श्रीगोतमोवा धुतवावदूकः ॥ ५ ॥
सार्थार्थशास्त्रेपि विनार्थमेव प्रयत्नवानर्थकरो य आप्तः ॥
धर्मध्वजिव्रातततमोनिरासे भानूपमो धार्मिकतन्त्रतन्त्रः ॥ ६ ॥
ऐतिह्यकोद्यानविहारभृङ्गः श्रीवेदविज्ञाननिधानसङ्गः ।
योवैद्यकोदन्तविदां वरीयान् बोधश्च यस्योपनिषत्सु भूयान् ॥ ७ ॥
मारारिमारोपम आर्य्यवर्य्यैः प्रोक्तो यमी यश्च विशेषचर्य्यैः ।
क्रोधाग्निनिर्वापणवृष्टिकल्प स्तृषापिशाचीहृतिसिद्धकल्पः ॥ ८ ॥
वैराग्यपर्शुप्रहतारिमोहः सम्प्रोथितेर्ष्यादिरिपुप्ररोहः ।
अलीकपौलस्त्यविनाशरामः सत्यार्थसम्पत्तिविनोदरामः ॥ ९ ॥
परोपकाराध्वरदीक्षितो यः स्वयं स्वयंभगुरुवत्सुयोग्यः ।
सदा सदाचारविचारणोत्कः प्रज्ञाम्बकस्त्र्यम्बकसेवकोऽभूत् ॥ १० ॥
तस्य व्रजानन्दमहोदयस्य समीपमागादयमेकदैकः ।
श्रीपाणिनिव्याकरणादि तस्मादध्येतुकामः कमनीयबोधात् । ११ ॥
तदाश्रमद्वारमुपेत्य रुद्धं गम्भीरवाक्तं स उदाजहार ।
अपावृतं द्वारमये कृपालो! विधीयतां त्वां निकषा ऽऽगतोऽहम् ॥ १२ ॥
श्रुत्वा तदीयं कथनं यतीशः कोऽसीति तं प्रत्यवदद्वदान्यः ।
वर्त्ते दयानन्दसरस्वतीति प्रत्युत्तरं सोऽपि ददे तदर्थम् ॥ १३ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

किंहेतुकस्तावक आगमोऽत्र ब्रूहीति विस्पष्टममुं पुनः सः ।
आख्यातवानागमपारदृश्वा सोऽप्याचचक्षे स्वमनोभिलाषम् ॥ १४ ॥
किं व्याकृतिस्ते पठितेत्यवोचद् भूयोपि तं व्याकरणैकविज्ञः ।
सारस्वताद्यं भगवन्नपाठि प्रत्याह सम्यङ्मितभाषणोऽसौ ॥ १५ ॥
द्वारं समुद्घाट्य निजान्तिकस्थं कृत्वा ततः साञ्जलिमानतं तम् ।
तद्वद्विवैशद्यपरीप्सुरादौ परीक्ष्य तुष्टोऽथ जगाद दण्डी ॥ १६ ॥
ग्रन्थोऽस्ति सारस्वतनामको योऽ —धीतस्त्वया वत्स? परिश्रमेण ।
मन्ये तदीयाभ्यसनं मुधाऽहं सद्व्याकृतेर्लक्षणहीनतादेः ॥ १७ ॥
ऋषिप्रणीतस्तु यथार्थबोधो भिन्नोस्त्यतो व्याकरणप्रबन्धः ।
वेदाङ्गतां यस्य महानुभावाः समुक्तकण्ठं प्रवदन्ति तज्ज्ञाः ॥ १८ ॥
अशक्तिजं पुंक्षुपदं प्रयुज्य क्वचित्सभायामनुभूतिवृद्धः ।
न्यक्कारभाग्लज्जितमानसोऽपि तत्साधुतां नेतुमनाः कदाचित् ॥ १९ ॥
सारस्वतं व्याकरणं दुराशो विनिर्ममे वैदिकबोधशून्यम् ।
प्रमादजन्यां ह्यपि जातु कश्चित् त्रुटिं नवा स्वामुररीकरोति ॥ २० ॥
परन्तु नो पुंक्षुपदं प्रयातं साधुत्वमद्यापि बुधां समाजे ।
निसर्गदुष्टं तु शुचित्वजुष्टं कर्तुं समर्थो न पितामहोऽपि ॥ २१ ॥
परन्तु यावद्भवता नितान्तं न त्यज्यते नूतनकृतिःसमस्ता ।
जायेत तावन्मुनिनिर्मितेषु ग्रन्थेषु ते सौम्यकुतोऽधिकारः ॥ २२ ॥
इत्थं वदन्तं तमुवाच वाग्मी ललाटभागञ्जलिरानतास्यः ।
समञ्जसं यद्भवता प्रतीतं मां पाठयेत्तत्कृपया महात्मन् ॥ २३ ॥
संन्यासिलोकाध्ययनं कथं स्यान् ममान्तिके नित्यमये यथार्थम् ।
भिक्षादिकादानवशात्प्रभाते पाठप्रबन्धे भविताऽतिविघ्नः ॥ २४ ॥
एवं तदीयं दृढभक्तिभावं विज्ञातुकामोऽथ विलोचनोऽपि ।
स दरदर्शी निजगाद शिष्यं परीक्षितं कार्यमभीष्टदं हि ॥ २५ ॥
काले यदा मे पठनं भवन्तो निश्चाययिष्यन्ति यथाव्यवस्थम् ।
तदैव देवाङ्घ्रिसमीपवर्ती भविष्यतीत्येष जनोऽब्रवीत्सः ॥ २६ ॥
यद्धेतुकं मे भवतः समीपे समागतं मान्यवरस्य विद्वन् ।
सिद्धिं विना तस्य कदापि गन्तुं समुत्सहेय क्वचिद्य द्वंहो ॥ २७ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

जलाऽऽभृतां कोऽत्र नदीं तृषार्त्तस्त्यक्त्वा व्रजेत्पल्वलमाविलापम् ।
इत्युक्तवान् पञ्चदिनानि यावत् चक्रे स्थितिं तत्सविधे मुधापि ॥ २८ ॥
निःशेषनैजान् नियमान् पुरस्तात् स्वीकारयित्वाथ यमीश्वरः सः ।
अध्यापयामास मनोऽभिलाषं मेधाविनं शिष्यगुणैः परीतम् ॥ २९ ॥
चिरेण कालेन हि मेधिरोऽसौ श्रीपाणिनिव्याकरणं कृतिज्ञः ।
प्रचर्य्य तस्माद्गुरुतोऽतिभक्त्या शब्दार्थसम्बन्धविदांवरोऽभूत् ॥ ३० ॥
विनिस्पृहोऽप्यत्रभवांस्तदीयो गुरुस्तदर्थं विदधे तदानीम् ।
भिक्षां महाभाष्यपरिक्रियाय प्रेमाचितःकिं न जनः करोति ॥ ३१ ॥
तद्धैर्यसम्पत्तिपरीष्टिहेतो–रिव प्रभुर्हन्त तदा विलासी ।
दुर्भिक्षचारं हतभोगसारं व्रज व्रजेतिसमादिदेश ॥ ३२ ॥
दुर्भिक्षदुःसाध्यपरीक्ष्यमाणोनोदुर्मना धैर्यधनोऽजनिष्ट ।
यथा यथा काञ्चनमग्नियोगात् परीक्ष्यते भाति तथा तथा तत् ॥ ३३ ॥
दुर्गाभिधः क्षत्रियवंशमुख्यः काले तदा तस्य कृतेऽन्नदानम् ।
ददे स्म तेनैव शरीररक्षां व्यधात्स संतोषिजनानुरूपम् ॥ ३४ ॥
औदीच्यविप्रोऽमरलालसंज्ञः संज्ञातसत्कारफलप्रशस्तिः ।
सम्पत्तिमान् लब्धयशास्ततोऽभूत् सहायकः कोऽपि तपस्विनोऽस्य । ३५
घटव्रजं निर्मलनीरपूर्णं कृते गुरोर्नित्यमसौ निनाय ।
यमस्वसुर्भक्तियुतोयमीशः सेवावशो वास्ति गुरुप्रसादः ॥ ३६ ॥
शारीरिकोत्कर्षनिमित्तमार्यो व्यायामसम्पादरुचिं चकार ।
आत्मोन्नतिप्रीतमनाः समाधिं यथावकाशञ्च ततान सम्यक् ॥ ३७ ॥
यथोक्तकारी शुभकल्पधारी विद्याविहारी कुमतिप्रहारी ।
स ब्रह्मचर्यव्रतपालनाय प्रोत्साहयन् मित्रगणं गुणज्ञम् ॥ ३८ ॥
नक्तं स चैकादशवादनान्तं निरन्तरं दत्तमना अधीतम् ।
चकार कण्ठस्थमतन्द्रितात्मा बुध्येत वा शास्त्रनिगूढतत्त्वम् ॥ ३९ ॥
विभातकाले स यतिः समाधिमान् समाधिहीनोऽपि कदाचिदेककः ।
शिवालयं भानुसुतासमीपग मुपेत्य चक्रे प्रणवस्य चिन्तनम् ॥ ४० ॥
तपस्विनी काचन कामिनी तदा सुताननालोकनजातसुस्पृहा ।
वरप्रदाने प्रभुमात्मनः कृते विभाव्य तं तन्निकटं समासदत् ॥ ४१ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विकीर्णबाला कृतहस्तसंपुटा मनोहरालापविधानपण्डिता ।
अमण्डिता चाऽपि विशेषमण्डनै र्मनोज्ञरूपाऽस्य पपात पादयोः ॥ ४२ ॥
विलोक्यतां दुःखिमना महामनाः कुतः समागा असि का मदन्तिके ।
अयुक्तमेतत्तव कार्य्य मङ्गने! व्यधायि यत्स्पर्शनमङ्घ्रितो मम॥ ४३ ॥
प्रयाहि शीघ्रं यदि शिष्टतालवो विराजते देवि मनागपि त्वयि ।
स एवमाद्यैर्वचनैः प्रहित्य तां दिनत्रयं यावदुपोषितोऽभवत् ॥ ४४ ॥
प्रसार्य दृष्टिं ह्यपि नालुलोके कान्ताननः कामपि कामिनीं सः ।
साकं कयाचित् कथने प्रवृत्तिः स्वप्नेऽपि जायेत कुतस्तदीया ॥४५॥
गीर्वाणवाणीमधिकृत्य नूनं प्रायस्तदाऽसौ व्यवहारमाधात् ।
संध्यादिकर्तुञ्च सदा द्विजेभ्यः शिक्षां ददे शिक्षणपण्डितीकः ॥४६॥
विनाप्रसङ्गेन गुरुः कदाचिद् रोषाकुलस्तं मठतो निरास ।
रोषोऽप्यहो कोपि विशेषरोगो यत्क्रान्तिभाक् चेतयते न जन्तुः ॥४७॥
गतस्मयः शान्तिधरो गुणीशन्ततो गुरुं नम्रतयाऽनुनिन्ये ।
प्रणामभैषज्यवशात्परैति महात्मनां मङ्खु हि मन्युरोगः ॥४८॥
हस्तेऽथ यष्ट्या तमताडयद्गुरुर्गुरुक्रोधसमाकुलात्मा ।
तज्जातशुष्कव्रणचिन्हयोगादाजन्म शिष्यस्तमहो शशंस ॥४९॥
कृपायमाणैर्गुरुभिर्निकारं कृतं नरो यः सहतेऽतिभारम् ।
स एव धन्यः समये कदाचित् प्राप्नोति लोके हि यशो विपश्चित् ॥५०॥
समाप्तविद्यः स ततः कदाचिल्, लवङ्गकोपायनपाणिरारात् ।
गुरोः समागम्य नमः सनाथं सगद्गदं प्राह वचोऽतिनम्रः ॥५१॥
गुरो कृपालो ! भवतः सकाशा ल्लब्धं मया लभ्यमये समस्तम् ।
यत्तद्व्यतीहारविधौ समर्थः कथं भवेयं कृपणो मनुष्यः ॥५२॥
लवङ्गजातं भगवन्ममेदं तुच्छोपहारं कृपया गृहाण ।
नैवास्तिदातुं सविधे मदीये वस्त्वन्तरञ्चेति महाविषादः ॥५३॥
अकिञ्चनत्वं स्वयमेव देवो जानाति मे वास्ति परं प्रसादः ।
यो द्रव्यसत्वेऽप्युपयोगकाले मितंपचः सैव महाधमो यत् ॥५४॥
आज्ञापनीयोऽस्तितरां दयालो ! गन्तुं बहिःशिष्यजनोऽयमद्य ।
कार्येण कार्येण विना विधानं स्थितेर्नवा क्वापि वरं हि भिक्षोः ॥५५॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

निवेदनं तस्य गुरुर्निशम्य प्रमोदसन्दोहविभावितात्मा ।
विचार्य किञ्चिन्मनसि क्षणं वा भव्यं वचः शिष्यतमं किलाह ॥५६॥
तुष्यामि ते वत्स ? सुशिष्यभावान्नापेक्ष्यते स्वस्य कृते धनादि ।
यत्त्वं विधातुं पटुधीः प्रतीतः स्तदेव विज्ञापयितुं मनो मे ॥५७॥
धर्मोपदेशेन विना जगत्याः शोच्या दशा याऽद्य बतास्ति जाता ।
तां पश्यतो दुःखितमस्ति चित्तं ममाऽत्र तच्छान्तिकरो भवान् स्यात् ॥ ५८
प्रतर्जयन्तीव भृशंहि सभ्यतामसभ्यता राजति राजवद्भुवि ।
वाचंयमत्वव्रतमद्य सर्वथा वाचालताधीनमिव प्रलक्ष्यते ॥५९॥
परोपकारित्वगुणः फलोदयं गतो ननु स्वार्थितयातिरस्कृता ।
कृतज्ञताया अपि भूमिराहृता कृतघ्नताचारबलैरिवाभवत् ॥६०॥
तपस्विधर्मोपि दिवाधिवासिता मगादिवाधर्मनिरुद्धवृत्तिकः ।
मिथो न विश्वासकथा निशम्यते सम्बन्धिलोकेऽपि नयप्रभवतः ॥६१॥
नखंपचत्वाऽहितभर्त्सिता सती पलायते वाद्यतरामुदारता ।
अखर्वगर्वोद्भवभीतिकारणाद्विनम्रता शोच्यदशेव लक्ष्यते ॥६२॥
क्रुधाभिभूतेव तपस्विनी क्षमा क्षमातलाद्गन्तुमनाविभाव्यते ।
कण्ठीरवाद्गौरिव हन्त लोभतः संतोषिता भीतमनाः पलायिता ॥६३॥
गले गृहीत्वेव विरागतामहो सरागता नाशयितुं समुद्यता ।
अशान्तिदेवी सकलेऽपि भूतले निजाधिपत्यं तनुते व सर्वथा ॥६४॥
गुरुर्बुभूषन्नवरोपजातितो वर्णाग्रजानामपिधृष्टाताश्रयः ।
निरक्षरोप्यत्र वदवदो जनः कृतार्थतामेति परिश्रमंविना ॥६५॥
आसन्पुरा ये गुरवो हितव्रताः शिष्यप्रिया विप्रजनास्तपोधनाः ।
विद्यादिकालङ्करणैरलङ्कृतास्तेषां प्रजाः सम्प्रति शोच्यतां गताः ॥६६॥
कालोस्त्ययं कोपि महाप्रभावो जागर्ति यस्याद्य करालभावः ।
संसारमध्ये यदहोजनानां नितान्तचिन्ता खलु भोजनानाम् ॥६७॥
सामर्थ्यशाली कृतपातकोऽपि निष्पापतामेति धनादिभावात् ।
निष्पापको याति धनादिहीनः पापत्वमाहो नच नेह दीनः ॥६८॥
या पुण्यभूमिर्निगमाध्वगामिभि र्विद्वद्वरैः कान्तयशाः पुराऽभवत् ।
सैवाद्य ! हा ! हन्त ! कुदृष्टिभाग्जनैरध्यासिता शोच्यदशा प्रजायते ॥६९॥
यस्यां पुरा रामनिभा महीभुजो भुजार्जितानल्पयशःसमृद्धयः
भूम्यामभूवन् निखिलासु भूमिषु न क्षत्रियाःसम्प्रति सन्ति तद्विधाः॥७०॥

CC-0. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तुलाधराद्याश्च विशोविशांवरा यतोऽभवन् धर्म्मयशःपुपः पुरा ।
तदीयवंश्या अपि किं तथाविधाः क्वचिच्छ्रुताः सन्ति भुवस्तलेऽखिले ॥७१
द्विजन्मसेवाव्रतधारिणो यतः समञ्जसाचारविचारशालिनः ।
जघन्यजाश्चापि जनिं विलेभिरे किमङ्ग तत्राद्य तदात्मजास्तथा ॥ ७२ ॥
निरक्षरा दम्भजुषोऽत्र मानवा यथेप्सितं यान्ति पदं समित्स्वपि ।
अनेकविद्याभ्यसनेऽतिकौशला निराश्रया यान्ति न कां विडम्बनाम् ॥७३
परातनाचारविचारचातुरी किमाश्रया कुत्र विराजतेऽधुना ।
अनार्यदेशस्थजनानुकारतः कैः सेव्यते वंशपरम्परावृतम् ॥ ७४ ॥
न वेदशास्त्राध्ययनं द्विजेष्वपि निशम्यते साम्प्रतमङ्गसंसृतौ ।
अनार्यभाषाऽभ्यसनोत्क्रमानसाः पराङ्मुखा[1]मातृमुखाःस्वकर्मतः ॥ ७५ ॥
अधीतशास्त्रा अपि विप्रवंशजा मनस्विनो नाद्य भवन्ति सत्कृताः ।
यथा तथा हीनकुलोद्भवाः श्रिया सम्मानभाजोऽत्रभवन्ति संसृतौ ॥७६॥
न होमसद्दानकथाप्रचारणा न धारणाधार्मिकतत्त्वनिश्चये ।
विचारणा स्यात्कथमीशभावने सम्भावनीया भुवनेऽद्यसूरिभिः ॥ ७७ ॥
पतिव्रतानामपि पूर्वजानां कर्तव्यता कुत्रगता जगत्तः ।
विज्ञातुकामा इति केऽपि लोकाः प्रयान्ति नैराश्यपदं सशोकाः ॥ ७८ ॥
वर्णाश्रमाणां ननु रीतिजातं न दृश्यते हा कुहचित्प्रयातम् ।
रुदन्ति गावो बत हन्यमानाः कठोरभावैः पुरुषैर्विमानाः ॥ ७९ ॥
अस्मासु जीवत्स्वपि दुश्चरित्रं बोभूयतेऽदो भुवि किं विचित्रम् ।
नैवास्तिशक्तिर्मयि वक्तुमग्रे जातं कलौ यद्भुवने समग्रे ॥ ८० ॥
वधान धैर्यं कुरु निश्चयं त्वं पाखण्डसन्दोहविखण्डनाय ।
वेदप्रचाराय च सौम्य ! कुर्याः प्रयत्नजातं जगतां हिताय ॥ ८१ ॥
इत्येव मे त्वां प्रति धर्मबुद्धे ! जागर्ति भिक्षो ! परमो निदेशः ।
इत्युक्तवान् युक्तियुतं व्यरंसीत् वाचंयमोऽत्युक्तिरुचिः कुतः स्यात् ॥८२॥
इति वचो गुरुणा गुरुणेरितं सकललोककृते हितसाधनम् ।
अथ निशम्य निशान्तमना मनाक् कृतविचार उदाहरदोम्पदम् ॥ ८३ ॥

इति श्रीमेदसिंहशर्म्मतनूजन्मदिलीपदत्तशर्मनिर्मिते

मुनिचरितामृते-एकादशो विन्दुः॥

समाप्तं [illegible]

१—मातृमुखो मूर्खः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राप्तिस्थानम्—
प० दिलीपदत्तशर्मा
महाविद्यालयः ज्वालापुरम् O. R. B.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.